A. Or.
4282

UTTARA RÁMA CHERITRA,

OR

CONTINUATION OF

THE HISTORY OF RÁMA,

A DRAMA,

IN SEVEN ACTS.

BY

BHAVABHÚTI.

With a Commentary,

EXPLANATORY OF THE PRÁKRIT PASSAGES.

PUBLISHED UNDER THE AUTHORITY OF THE COMMITTEE OF PUBLIC INSTRUCTION.

Calcutta:

PRINTED AT THE EDUCATION PRESS, CIRCULAR ROAD; AND SOLD AT THE DEPOSITORY, PATALDANGA.

1831.

Digitized by Google

A. or. 4282

Shavakhūdi

Wm. H. Allen & Co.
Booksellers, Publishers & Importers of
Oriental Works;
7 Leadenhall Street.
Maps, Charts, Stationary &c.

Digitized by Google

VALUABLE ORIENTAL WORKS

OF THE

ASIATIC SOCIETY OF BENGAL,

BIBLIOTHEC
REGIA
MONACENSI

Published in London by

Wm. H. Allen & Co., 7, Leadenhall Street.

The Supreme Government of India having transferred to the Asiatic Society of Bengal, the Oriental Works which have been either wholly or in part published in Calcutta, under the authority of the General Committee of Public Instruction, the Society is enabled to direct the disposal of them at the

FOLLOWING REDUCED PRICES.

---

1. MOOLUKHKHUS-OOL-TUWAREEKH, being an Abridgment of the celebrated Historical Work called the Seir Mootakherin, prepared chiefly by Maulavi Abdool Kerim. (Persian). Royal 4to. £1. 5s. boards.

2. MOOJIZ-OOL-QANOON: a Medical Work, by Alee bin Alee Il Huzm, the Karashite, commonly known by the name of Ibn-ool-Nufees. (Arabic). 4to. 10s. 6d. boards.

3. BHATTI KAVYA; a Poem, on the Actions of Rama; with the Commentaries of Jayamangala and Bharatamallika. (Sanscrit). 2 vols. Royal 8vo. £1. 10s. boards.

4. LAGHU KAUMUDI: a Sanscrit Grammar, by Vadaraja. Royal 12mo. 5s. 6d. boards.

5. MUGDHABODHA: a Sanscrit Grammar, by Vopadeva. Royal 12mo. 5s. 6d. boards.

6. NYAYA SUTRA VRITTI: the Logical Aphorisms of Gotama, with a Commentary by Viswanáth Battáchárya. (Sanscrit). 8vo. 5s. 6d. boards.

7. BHASHA PARICHHEDA and SIDDHANTA MUKTAVALI: an Elementary Treatise on the Terms of Logic, with its Commentary, by Viswanatha Panchanana Bhatta. (Sanscrit.) Royal 8vo. 5s. 6d. boards.

8. LILAVATI: a Treatise on Arithmetic, translated into Persian from the Sanscrit work of Bhascara Acharya, by the celebrated Feizi. Royal 8vo. 5s. boards.

Ditto ditto, in Sanscrit. Royal 8vo. 5s. sewed.

9. SELECTIONS, Descriptive, Scientific, and Historical; translated from English and Bengalee into Persian, for the use of Native Youth. Royal 8vo. 7s. 6d. boards.

Digitized by Google

10. SAHITYA DERPANA: a Treatise on Rhetorical Composition, by Viswanath Kaviraja. (Sanscrit). Royal 8vo. 9s. boards.

11. FUTAWA ALEMGIRI: a Collection of Opinions and Precepts of Mohammedan Law, compiled by Sheikh Nazim and other learned men, by command of the Emperor Aurungzeb Alemgir. (Arabic). 6 vols. Royal 4to. £9.

Ditto ditto, Vol. 1 to 4, separate. £1. 10s. each.

"The *Fatáwá Alemgiri* being four times the size of the Hidayah, and containing little more than a recital of law cases, without the arguments and proofs which are diffusely stated in the Hidayah, it must possess an advantage over that work, for practical use, in its greater number of cases and examples. Without contrasting their respective merits, however, the one is universally admitted to be a most useful supplement to the other; and a conversance in both, or an easy means of reference to them in cases of judicial occurrence, must be of essential use towards the due administration of the Mahommedan law, as far as that law is declared to be the established rule and standard of decision."—*Harington's Remarks on the Authorities of Mohammedan Law.* As. Res. X. 475.

12. Short ANATOMICAL DESCRIPTION of the HEART, extracted from the Edinburgh Medical Dictionary, and translated into Arabic, by JOHN TYTLER. 8vo. 2s. boards.

13. DAYA TATWA: a Treatise on the Law of Inheritance, by Raghunandana Bhattáchárya. Edited by Lakshmi Náráyan Serma. (Sanscrit). 8vo. 2s. 6d. boards.

14. DAYA KRAMA SANGRAHA: a Compendium of the Order of Inheritance, by Krishna Terkalankara Battáchárya. Edited by Lakshmi Náráyan Serma. (Sanscrit). 8vo. 2s. 6d. boards.

15. DAYA BHAGA, or Law of Inheritance: a new Edition, with a Commentary by Krishna Terkalankara. (Sanscrit). 8vo. 8s. boards.

16. KAVYA PRAKASA: a Treatise on Poetry and Rhetoric, by Mammata Acharya. (Sanscrit). 8vo. 5s. 6d. boards.

17. VEDANTA SARA: Elements of Theology, according to the Vedas, by Sadánanda Parivrajakácháryya; with a Commentary, by Ramakrishna Tirtha. (Sanscrit). 8vo. 5s. 6d. boards.

18. VYAVAHARA TATWA: a Treatise on Judicial Proceedings, by Raghunandana Bhattáchárya. Edited by Lakshmi Narayan Serma. (Sanscrit). 8vo. 2s. 6d. boards.

19. CH,HUTRU PRUKASH: a Biographical Account of Ch,hutru Sal, Raja of Boondelkhund, by Lal Kuvi. Edited by Capt. W. PRICE. (Brij Bhakha). 8vo. 8s. boards.

20. The KIFAYA, a Commentary on the Hidayah: a Treatise on the Questions of Mohammadan Law, by Hukeem Mouluvee Abdool Mujeed, and other learned men of Calcutta. (Arabic). Vols. 3 and 4. 4to. £3. sewed.

21. The INAYAH: a Commentary on the Hidayah: a Work on Mohummudan Law, compiled by Mohummud Akmulooddeen, Ibn Muhmood, &c. Edited by Moonshee Ramdhun Sen: with the aid of Mouluvees Hafiz Ahmud Kubeer, Futuh Ulee, and others. (Arabic). Vols. 3 and 4. 4to. £3. sewed. The second volume now in hand.

22. MITAKSHARA: a Compendium of Hindu Law, by Vijnáneswara: founded on the Texts of Yajnawalkya. The Vyavahara Section, or Jurisprudence. Edited by Sri Lakshmi Naráyán Nyayalancara. (Sanscrit). 8vo. 9s. 6d. sewed.

Digitized by Google

23. RAGHU VANSA, or Race of Raghu: a Historical Poem, by Kálidása, with a Prose Interpretation of the Text by Pundits of the Sanscrit College of Calcutta. (Sanscrit). Royal 8vo. 14s. sewed

24. ASHSHURH-OOL-MOOGNEE, COMMENTATIO ABSOLUTA: a Commentary on the Moojiz ool Kanoon, known by the name of The Sudeedee, compiled by the celebrated Physician Maulana Sudeed Kazroonee, on the Theory and Practice of Physic and the Materia Medica, &c. Edited by Hukeem Mouluvee Abbool Mujeed, and others. (Arabic). 4to. £1. 10s. sewed.

25. The MAHABHARATA: an Epic Poem, written by the celebrated Veda Vyása Rishi. Vol. I. (containing the Adi Parva—Sabha Parva—Vana Parva). Edited by learned Pundits. Royal 4to. £1. 10s. sewed. To be completed in Five Volumes.

"The Mahábhárat details the dissensions of the *Pándava* and *Kaurava* princes, who were cousins by birth, and rival competitors for the throne of Hastinapur. The latter were at first successful, and compelled the former to secrete themselves for a season, until they contracted an alliance with a powerful prince in the Panjáb, when a part of the kingdom was transferred to them. Subsequently this was lost by the *Pándavas* at dice, and they were driven into exile, from which they emerged to assert their rights in arms. All the princes of India took part with one or other of the contending kinsmen, and a series of battles ensued at *Kuru Kshetra*, the modern *Tahnesar*; which ended in the destruction of Daryodhana and the other *Kaurava* princes, and the elevation of Yudhishthira, the elder of the *Pándava* brothers, to the supreme sovereignty over India."—*Wilson*, As. Res. xvii. 609.

26. The RA'JA TARANGINI, a History of Cashmir. (Sanscrit). Royal 4to. £1. 5s. sewed.

"The only Sanscrit composition yet discovered to which the title of history can with any propriety be applied, is the *Rája Tarangini*, a History of Cashmir. This work was first introduced to the knowledge of the Mahomedans by the learned minister of Akber, Abulfasl, who has given a summary of its contents, taken from a Persian translation prepared by order of Akber." "Mr. Gladwin's English version of this abstract excited curiosity and stimulated inquiry, but the result was unsatisfactory, and a long period intervened before the original work was discovered. Sir William Jones was unable to meet with it, although the history of India from the *Sanscrit Cashmir* authorities was amongst the tasks his undaunted and indefatigable intellect had planned; it was not until the year 1805 that Mr. Colebrooke was successful in his search. He procured a copy of the work from the heirs of a brahmin who died at Calcutta, and about the same time another transcript was obtained by Mr. Speke from Lucknow. I purchased a third brought for sale to Calcutta; and I have been hitherto unable to meet with any other transcript of this version."—*Wilson's Essay on the History of Cashmir*. As. Res. xvi. 1.

27. The SUSRUTA, or System of Medicine, taught by Dhanwantari, and composed by his disciple Susruta (Sanscrit). Vol. I. 8vo.; 9s., to be completed in two volumes.

"The author of the *Sausruta*, which ranks the second work in antiquity, and is decidedly the first in merit of the Hindu writers on the medical art. Susruta is the only one who attempts to lay down a systematic course of proceeding (in cases of leprosy)."—*Wilson on Kushta or Leprosy, as known to the* HINDUS, Trans. Med. Soc. Cal. i. 26.

28. The JAWA'ME UL ILM UL RIYAZI', an Arabic translation of Hutton's Mathematics, by Dr. J. Tytler. Part I. Arithmetical Notation to Tables of Powers and Roots. 4to., 9s.

29. MRICHCH,HAKATI, a Comedy, by Sudraka Raja; with a Commentary, explanatory of the Prakrit Passages. (Sanscrit). 8vo. 12s. sewed.

30. UTTARA RAMA CHERITRA, or Continuation of the History of Rama: a Drama, in Seven Acts, by Bhavabhuti; with a Commentary, explanatory of the Prakrit Passages. (Sanscrit). 8vo. 2s. 6d. sewed.

31. MALATI and MADHAVA: a Drama in Ten Acts, by Bhavabhuti; with a Commentary, explanatory of the Prakrit Passages. (Sanscrit). 8vo. 2s. 6d. sewed.

32. MUDRA RAKSHASA, or the Signet of the Minister; a Drama in Seven Acts, by Visakha Datta; with a Commentary, explanatory of the Prakrit Passages. (Sanscrit). 8vo. 2s. 6d. sewed.

33. RETNAVALI, a Drama in Four Acts, by Shri Hersha Deva;

Digitized by Google

with a Commentary, explanatory of the Prakrit Passages. (Sanscrit). 8vo. 2s. 6d. sewed.

34. VIKRAMORVASI, or Vikrama and Urvasi; a Drama, by Kálidása; with a Commentary, explanatory of the Prakrit Passages. (Sanscrit). 8vo. 2s. sewed.

Works in Progress.

1. The NAISHADA, a popular Sanscrit Poem, with Commentary by a Pandit of the Government Sanscrit College. In 8vo.; 600 pages, or one-third of the whole, printed.

"This poem is universally read by students of the Sanscrit language, as a poetical class book. It was on this account recommended for publication to the Committee of Instruction. It bears the name of Srí Harsha, whose reputation rests altogether on this pleasing and popular version of the famed episode of Nala and Damayanti, a subject which has also engaged the pens of other celebrated Indian writers, after its first narration in the Mahábhárata.

2. The SARIRA VIDYA, a Sanscrit translation of Hooper's Vade-Mecum, by Madan Mohan, Physician to the Sanscrit College. In 8vo.; one quarter printed.

3. The KHA'ZA'NAT UL ILM. (Persian). 1 vol. large 4to., 620 pages, with numerous Lithographed Plates; one-fifth remains to be completed, which will occupy ten months.

Of this work, it is unnecessary to say more than that it contains a whole course of European mathematical and geometrical instruction, drawn up in Persian by Khán Jí, a learned native Munshi at Patna, since dead, aided by Dr. J. Tytler. It was intended, and is particularly well adapted, for the use of Seminaries, where the Persian language is read.

4. The ANIS UL MASARRAHI'N, an Arabic translation of Hooper's Vade-Mecum, by Dr. J. Tytler. In 4to., 320 pages. The Index or Glossary of Terms remains unfinished.

It is unnecessary to add (for the English reader) any notice of Dr. Tytler's translations of Hutton's Mathematics and Hooper's Vade Mecum into Arabic. The great learning of the Translator is sufficient warrant of his having executed his task in the best manner.

5. A TREATISE on ALGEBRA, in Arabic, proceeding on the basis of a translation of Bridge's Treatise, but much modified and enlarged: with an Appendix on the application of Analysis to Geometry and Trigonometry, by the Rev. Dr. Mill. 8vo., printed at Bishop's College. The first and second parts finished, to the end of Plane Trigonometry: the continuation of the Appendix to Spherics remains to be passed through the press.

A DICTIONARY, TIBETAN and ENGLISH, prepared with the assistance of the Bandé Sangs-Rgyas Phun-Tshogs, a learned Láma of Zangskár, by ALEXANDER CSOMA DE KÖRÖS. In 4to.; 25s. sewed.

A GRAMMAR of the TIBETAN LANGUAGE, in ENGLISH, by Alexander Csoma de Körös. In 4to.; 18s. sewed.

ASIATIC RESEARCHES; or Transactions of the Society, instituted in Bengal, for inquiring into the History, the Antiquities, the Arts and Sciences, and Literature of Asia. Vols. 17 and 18. Royal 4to.; £2. 2s. each, boards. Also, former volumes.

INDEX to ASIATIC RESEARCHES. Royal 4to. 15s. sewed.

JOURNAL of the ASIATIC SOCIETY of BENGAL. January 1832, to December 1835. 2s. 6d. each.

Digitized by Google

UTTARA RÁMA CHERITRA,

OR

CONTINUATION OF

THE HISTORY OF RÁMA,

A DRAMA,

IN SEVEN ACTS.

BY

BHAVABHÚTI.

With a Commentary,

EXPLANATORY OF THE PRÁKRIT PASSAGES.

PUBLISHED UNDER THE AUTHORITY OF THE COMMITTEE OF PUBLIC INSTRUCTION.

Calcutta:

PRINTED AT THE EDUCATION PRESS, CIRCULAR ROAD; AND SOLD AT THE DEPOSITORY, PATALDANGA.

1831.

Digitized by Google

BIBLIOTHECA
REGIA
MONACENSIS

BIBLIOTHECA
REGIA
MONACENSIS

Digitized by Google

॥ उत्तरं रामचरितं ॥

श्रीभवभूतिमहाकविविरचितं ।

साधारणविद्यावृद्ध्यर्थकसमाजाधिपतीनामाज्ञया

कलिकातानगरीस्थसंस्कृतयन्त्रालये

प्राकृतभाषाव्याख्यासहितं

मुद्रितमभूत् ।

१८३१

Digitized by Google

॥ उत्तरं रामचरितं ॥

॥ नाटकं ॥

॥ प्रथमाङ्कः ॥

॥ नान्दी ॥

इदं कविभ्यः पूर्व्वेभ्यो नमो वाकं प्रशास्महे;
विन्देम देवतां वाचममृतामात्मनः कलां।

॥ नान्द्यन्ते सूत्रधारः ॥

अलमतिविस्तरेण। अद्य खलु भगवतः कालप्रियनाथस्य यात्रायामार्य्यमिश्रान् विज्ञापयामि; एवमत्रभवन्तो विदाङ्कुर्व्वन्तु; अस्ति खलु तत्रभवान् काश्यपः श्रीकण्ठपदलाञ्छनो भवभूतिर्नाम ॥

यं ब्रह्माणमियं देवी वाग्वश्येवानुवर्त्तते,
उत्तरं रामचरितं, तत्प्रणीतं प्रयोक्ष्यते।

एषोऽहं कार्य्यवशादाधोधिकस्तदानीं ततश्च वैदेशिकः संवृत्तः ॥ समन्तादवलोक्य ॥ भोभो, यदा तावदत्रभवतः पौलस्त्यकुलधूमकेतोर्म्महाराजस्य रामस्याद्यमभिषेकसमयो राज्ञिन्द्विवसेषु कृतानन्दनान्दीकस्तत् किमद्य विघ्नान्तवारणानि चतुरस्रा नानि?

क

Digitized by Google

॥ प्रविश्य ॥ नटः ॥ सभाजादवलोक्य ॥ भाव, प्रेषिता हि ते खयूथ्यामहाराजेन सङ्गामसमरसुहृदो महात्मानः सवङ्ग राक्षसाः, समाजोपस्थायिनो नानादिगन्तादागता ब्रह्मर्षयो राजर्षयश्च, यदाराधनायैतावतोदिवसानुत्सवश्राणीत्।

सूच। एवमेतत्। संप्रतिहि,

वशिष्ठाधिष्ठिता देव्यो गता राघवमातरः,
अरुन्धतीं पुरस्कृत्य जग्मुर्जामातुराश्रमं।

नटः। वैदेहिकोऽस्मीति पृच्छामि। कः पुनरसौ जामाता।

सूच। कन्यां दशरथो राजा ग्राम्यां नाम व्यजीजनत,
अपत्यशान्तिकां राज्ञे सोमपादाय यां ददौ।

विभाण्डकसुतस्तामृष्यशृङ्ग उपयेमे, तेन च संप्रतं द्वादश वार्षिकं सत्रमारब्धं, तदनुरोधात् कठोरगर्भामपि वधूं जानकीं विमुच्य, गुरुजनस्तच गतइति।

सूच। तत्किमनेन; तदेहि राजद्वारमेव स्वजातिसमयेनोपतिष्ठावः।

नटः। तेन हि निरूपयतु राज्ञः सुपरिशुद्धामुपस्थान शोचपद्धतिं भावः।

सूच। मारिष;

सर्व्वथा व्यवहर्त्तव्यं, कुतोऽस्यवचनीयता,
यथा स्त्रीणां तथा वाचां साधुत्वे दुर्जनोजनः।

Digitized by Google

नटः। अतिदुर्जन इति वक्तव्यं,

देव्यामपि हि वैदेह्यां सापवादो यतो जनः,
रक्षोगृहे स्थितिर्मूलमग्निशुद्धौ तनिश्चयः।

सूत्र। यदि पुनरियं किंवदन्ती महाराजं प्रति स्यात्ततोऽतिकष्टं स्यात्।

नटः। सर्व्वथा ऋषयो देवतास्च श्रेयो विधास्यन्ति इति ॥ परिक्रम्य ॥ भोभोः कोदानीं महाराजः ॥ आकर्ण्य ॥ एवं जनाः कथयन्ति;

स्नेहात्सभाजयितुमेत्य दिनान्यमूनि
नीलोत्पलेन जनकोऽद्य गतो विदेहान्;
देव्यास्ततो विमनसः परिसान्त्वनाय,
धर्माधनादिशति वासगृहं नरेन्द्रः।

॥ इति निष्क्रान्तौ ॥ प्रस्तावना ॥

॥ ततः प्रविश्यासनोपविष्टौ रामः सीता च॥

रामः। देवि वैदेहि समाश्वसिहि। तएव गुरवो न प्रकुवन्त्य स्मान्वियोक्तुं।

किन्त्वनुष्ठाननित्यत्वात्स्वातन्त्र्यमपकर्षति;
सङ्कटा स्माहिताग्नीनां प्रत्यवायैर्गृहस्थता।

सीता। जाणामि अज्जउत्त, जाणामि; किन्तु सन्दावआरिणो बन्धुजणविप्पओआ होन्ति। (१)

---

(१)। जानाम्यार्य्यपुत्र जानामि किन्तु सन्तापकारिणो बन्धुजनविप्रयोगा भवन्ति।

Digitized by Google

रामः। एवमेतत्; एवमेते हि हृदयमर्मच्छिदः क्षण्वमी संसारभावाः येभ्यो बीभत्समानाः संत्यज्य सर्व्वान् कामानरण्ये मनीषिणो विश्राम्यन्ति ॥

॥ प्रविश्य कञ्चुकी। रामभद्र दृष्ट्यर्द्धाक्षे ॥ साञ्जलिं ॥ भो महाराज।

रामः ॥ सस्मितं ॥ आर्य्य, ननु रामभद्र; दृष्ट्येव मां प्रत्युपचारः शोभते तातपरिजनस्य; तद्यथाभ्यस्तमुच्यतां।

कञ्चुकी। क्षण्यशृङ्गाश्रमादृष्यशृङ्गः प्राप्तः।

सीता। अज्ज; तदो किं विलम्बीअदि। (१)

कञ्चुकी। निष्क्रान्तः ॥

॥ प्रविश्य ॥ अष्टावक्रः। स्वस्ति वां।

रामः। आर्य्य अभिवादये; दृत आस्तां।

सीता। णमो णमो दे; अवि कुशलं समग्गस्स मम गुरुजणस्स अज्जाए संताए? (२)

रामः। निर्व्विण्णः सोमपीथी आवृत्तो मे भगवानृष्यशृङ्गः; आर्य्या च शान्तेति?

सीता। अम्हे वा सुमरेदि? (३)

---

(१)। ततः किं विलम्ब्यते।

(२)। नमो नमस्ते;ऽपि कुशलं समग्रस्य मम गुरुजनस्यार्य्यायाः शान्तायाः।

(३)। अस्मान् वा स्मरति।

Digitized by Google

अष्टा ॥ उपविश्य ॥ अथकिं, देवि, भगवान् वशिष्ठस्तामाह,

विश्वम्भरा भगवती भवतीमसूत,
राजा प्रजापतिसमो जनकः पिता ते,
तेषां वधूस्त्वमसि, नन्दिनि, पार्थिवानां,
येषां गृहेषु सविता च, गुरुर्व्यधत्त ।

तत्किमन्यदाशास्महे केवलं वीरप्रसवा भूयाः ।

रामः । अनुगृहीतोऽस्मि ।

लौकिकानां हि साधूनामर्थं वागनुवर्त्तते;
ऋषीणां पुनराद्यानां वाचमर्थोऽनु, धावति ।

अष्टा । इदं भगवत्या अरुन्धत्या देवीभिः श्वश्रूभ्यां च भूयोभूयः संदिष्टं; यः कश्चिद्भवतो दोहदो भवत्यास्याः सोऽवश्यमचिरात् संपादयितव्यः ।

रामः । क्रियते यदेषा कथयति ।

अष्टा । ननान्दुः पत्या चाभिहितं कृत्यमङ्गलेन वत्से कठोरगर्भेति, नागीनाम्नि; वत्सोऽपि रामभद्रस्य दिनोदार्थमेव स्थापितः; तत्पुनर्पूर्णोत्सङ्गामायुष्मतीं द्रक्ष्यामि ।

रामः ॥ सहर्षस्मितं ॥ तथास्तु, आर्य्य; भगवता वशिष्ठेन पुनः किञ्चिदादिष्टोऽसि?

अष्टा । श्रूयतां ।

जामातृयज्ञेन वयं निरुद्धास्त्वं बालएवासि, नवञ्च राज्यं,
युक्तः प्रजानामनुरञ्जने स्यास्तस्माद्यशो यत्परमं धनं वः;

रामः। यथाह भगवान् मैत्रावरुणिः;

स्नेहं, दयां च, सौख्यं च, यदि वा जानकीमपि,

आराधनाय लोकानां, मुञ्चतो नास्ति मे व्यथा।

सीता। अहोऽस्मै राघवकुलधुरन्धरो अज्जउत्तो।(१)

रामः। कः कोऽत्र भोः! विश्राम्यतामष्टावक्रः।

अष्टा॥ उत्थाय परिक्रम्य च॥ अये, कुमारलक्ष्मणः प्राप्तः।

॥ इति निष्क्रान्तः॥

॥ प्रविश्य॥ लक्ष्मणः। जयति जयति आर्य्यः। आर्य्य, तेन चित्रकारेणास्मदुपदिष्टमस्यां वीथ्यामार्य्यचरितमभिलिखितं; तत्पश्यत्वार्य्यः।

रामः। जानासि, वत्स, दुर्म्मनायमानां देवीं विनोदयितुं, तल्लिख्यन्तमवधिं यावत्?

लक्ष्म। यावदार्य्यायाऊतानने विप्रुड्डिः।

रामः। ग्राह्यं;

उत्पत्तिपरिपूतायाः किमन्याः पावनान्तरैः;

तीर्थोदकस्य, वह्नेश्च, मान्यतः शुद्धिमर्हतः।

लक्ष्म। देवि, देवयजनसम्भवे सीते प्रसीद; एष ते जीवितावधिः प्रणामः।

रामः। कष्टो जनः कुलधनैरनुरञ्जनीय-

स्तस्मै दुरुक्तमशिवं, नहि तत् क्षमं ते।

---

(१)। अतएव राघवकुलधुरन्धरआर्य्यपुत्रः।

Digitized by Google

नैसर्गिकी सुरभिणः कुसुमस्य सिद्धा,
मूर्द्धि स्थितिर्न चरणैरवताडनानि।

सीता। भोदु, अज्जउत्त, भोदु, एहि; पेक्खह्म दाव दे चरिदं(१)।

॥ इत्युत्थाय परिक्रामति ॥

लक्ष्म। इदं तावदालेख्यं।

सीता॥ निर्व्वर्ण्य॥ के दाणिं एदे उअरि णिरन्तरट्ठिदा उअत्तुणन्ति विअ अज्जउत्तं(२)?

लक्ष्म। देवि, एतानि सरहस्यशृङ्गकाख्यानि, यानि भगवतः शृङ्गात् कौशिकस्यर्षिं विश्वस्य मित्रं विश्वामित्रमुपसंक्रान्तानि, तेन च ताडकावधे प्रसादीकृतान्यार्य्यस्य।

रामः। वन्दस्व, देवि, दिव्यास्त्राणि।

ब्रह्मादयो ब्रह्महिताय तस्मा परःसहस्राः शरदस्तपांसि,
एतान्यपश्यन् गुरवः पुराणास्तान्येव तेजांसि तपोमयानि।

सीता। णमो णमो एदाणम्।(३)।

रामः। सर्व्वथेदानीं तत्प्रस्तुतिमुपस्थास्यन्ति।

---

(१)। भवतु, आर्य्यपुत्र, भवतु; एहि, प्रेक्षावहे तावत्ते चरितं।

(२)। के इदानीमेते उपरि निरन्तरस्थिता उपस्तुवन्तो वार्य्यपुत्रं।

(३)। नमो नम एतेभ्यः।

Digitized by Google

सीता। अणुगिहीदम्हि।(१)।

लक्ष्म। एष मिथिलावृत्तान्तः।

सीता। अम्महे, दलणवणीलुप्पलसामलसिणिद्धुमसिणसो हमाणमंसलेण देहसोहग्गेण, विम्हअत्थिमिदतादद्दीअन्तसुन्द रशिरी अणादरखुडिदमङ्करसरासणो, सिहंडमुद्धमुहमण्डलो, अज्जउत्तो आलिहिदे।(२)

लक्ष्म। आर्य्ये, पश्य पश्य।

सम्बन्धिनो वशिष्ठादीनेष तातस्त्वार्षति,
गौतमश्च शतानन्दो जनकानां पुरोहितः।

रामः। दृष्टमेतत्।

जनकानां रघूणाञ्च सम्बन्धः कस्य न प्रियः,
यच्च दाता गृहीता च स्वयं कुशिकनन्दनः।

सीता। एदे क्खु तक्खणकिदगोदाणमङ्गलाचत्तारो भाद रो विआहदीक्खिदा तुह्मे आणामि, तस्सिंय्येव पदेसे तस्सिं य्येव काले, वत्तामि।(३)

---

(१)। अनुगृहीतास्मि।

(२)। दलनवनीलोत्पलश्यामलस्निग्धमसृणशोभमान मांसलेन देहसौभाग्येन, विस्मयस्तिमिततातदृश्यमानसुन्दर श्रीरनादरखण्डितमङ्करशरासनः शिखण्डमुग्धमुखमण्डल, आर्य्यपुत्र आलिखितः।

(३)। एते खलु तत्कालकृतगोदानमङ्गलाश्चत्वारो भ्रातरो विवाहदीक्षिता यूयं जानामि तस्मिन्नेव प्रदेशे तस्मि न्नेव काले वर्त्ते।

Digitized by Google

रामः। समयः स वर्त्तत दूरैष यत्र मां
समनन्दयत्, सुमुखि, गौतमार्पितः,
अयमुद्गृहीतकमनीयकङ्कण
स्तव, मूर्त्तिमानिव महोत्सवः, करः।

लक्ष्म। दूयमार्य्या, दूयमप्यार्य्या माण्डवी, दूयमपि वधूः श्रुतकीर्त्तिः।

सीता। वत्स, दूयमपि अपरा का? (१)

लक्ष्म॥ सलज्जस्मित अपवार्य्य॥ अये, उर्म्मिला पृच्छत्यार्य्या; भवत्यन्यतः संचरामि॥ प्रकाशं॥ आर्य्ये, दृश्यतां द्रष्टव्यमेतत्। अयञ्च भगवान् भार्गवः।

सीता। भीदस्मि। (२)

रामः। ऋषे नमस्ते।

लक्ष्म। आर्य्ये, पश्य पश्य; अयमसावार्य्येण॥ इत्यर्द्धोक्ते॥

रामः॥ साक्षेपं॥ अयि, वञ्चतरं द्रष्टव्यमन्यतोदर्शय।

सीता॥ सस्नेहवज्रमानं निर्व्वर्ण्य॥ सुट्ठु सोहसि, अज्जउत्त, एदिणा विणअमाहप्पेण। (३)

---

(१)। वत्स, दूयमपि अपरा का।

(२)। भीतास्मि।

(३)। शोभसे, आर्य्यपुत्र, एतेन विनयमाहात्म्येन।

Digitized by Google

लक्ष्म। एतेवयमयोध्यां प्राप्ताः।

रामः॥ सखे॥ स्मरामि' हन्त, स्मरामि!

जीवलु तातपादेषु, नवे दारपरिग्रहे,
माद्भिश्चिन्त्यमानानां, ते हि नो दिवसा गताः!

दृष्ट्वमपि तदा जानकी।

प्रतनुविरलैः प्रान्तोन्मीलन्मनोहरकुन्तलै
र्दलितनलिनैर्मुग्धालोकं मिथुर्दधती मुखं,
खचितखलितैर्ज्योत्स्नाप्रायैरकृत्रिमविभ्रमै
रकृत मधुरैरङ्गानां मे कुतूहलमङ्कुरैः।

लक्ष्म। एषा मन्थरा।

रामः॥ अनुत्तरमन्यतो गत्वा॥ देवि वैदेहि,

इक्ष्वदीपादपः सोऽयं, शृङ्गवेरपुरे पुरा,
निषादपतिना यत्र स्निग्धेनासीत्समागमः।

लक्ष्म॥ विहस्य स्वगतं॥ अये, मध्यमाम्बावृत्तान्तमन्तरितमार्य्येण।

सीता। अज्जो, एसो जटासञ्जमणवुत्तन्तो। (१)

लक्ष्म। पुरःसंक्रान्तलक्ष्मीकैर्य्यद्दृष्टेक्ष्वाकुभिः कृतं,
धृतं वाक्ये तदार्य्येण पुण्यमारण्यकं व्रतं।

सीता। एसा पसण्णपुण्णसलिला भअवदी भाईरधी (२)

---

(१)। एष जटासंयमनवृत्तान्तः।

(२)। एषा प्रसन्नपुण्यसलिला भगवती भागीरथी।

Digitized by Google

रामः। देवि रघुकुलदेवते नमस्ते!

तुरगविचयव्यग्रानुर्वीभिदः सगराध्वरे,
कपिलमहसामर्षात् सुप्तान् पितुः प्रपितामहान्,
अगणितसमुत्तापं तस्मा तपांसि भगीरथो,
भगवति, तव स्पृष्टानद्भिश्चिरादुदतीतरत्।

सा त्वमम्ब क्षुधायामरुन्धतीव सीतायां शिवानुध्यानपरा भव।

लक्ष्म। अयमसौ भरद्वाजावेदितश्चित्रकूटयायिनि वर्त्मनि वनस्थलिः कालिन्दीतटवटः श्यामो नाम।

सीता। सुमरेदि एदे पदेसं अज्जउत्तो?(१)

रामः। अयि कथं विस्मर्यते।

अलसलुलितमुग्धान्यध्वसंजातखेदा
दभिविलपरिरम्भैर्दत्तसंवाहनानि,
परिमृदितमृणालीदुर्बलान्यङ्गकानि,
त्वमुरसि मम कृत्वा यत्र निद्रामवाप्ता।

लक्ष्म। एष विन्ध्याटवीमुखे विराधसंरोधः।

सीता। अलं दाव एदिणा, पेक्खामि दाव अज्जउत्तहत्थ धरिदताखवेण्टादवत्तं अत्तणो दक्खिणारण्णप्पवेसारम्भं(२)।

रामः। एतानि तानि गिरिनिर्झरिणीतटेषु,

वैखानसाश्रिततरूणि तपोवनानि।

(१)। स्मरत्येनं प्रदेशमार्य्यपुत्रः?

(२) अलन्तावदेतेन; प्रेक्षे तावदार्य्यपुत्रहस्तधृतताल वृन्तातपत्रमात्मनो दक्षिणारण्यप्रवेशारम्भं।

Digitized by Google

यच्चातिशेषपरमाः प्रमिणो भजन्ते
गीतारमुष्टिपचनाग्रहिणो गृहाणि।

लक्ष्म। अविरलानोकहनिवहनिरन्तरनिम्ननीलपरिसरा रण्यपरिणद्धगोदावरीमुखरकन्दरः, सततमभिष्यन्दमानमेघदुरितनीलिमा, जनस्थानमध्यमो गिरिः प्रस्रवणः।

रामः। अरसि, सुतनु, तस्मिन्पर्व्वते, लक्ष्मणेन,
प्रतिविहितसपर्य्याखस्थयोस्तान्यहानि?
अरसि सरसतीरां तच्च गोदावरीं वा?
अरसि च तदुपान्तेष्वावयोर्व्वर्त्तनानि?

अपिच। किमपि किमपि मन्दं मन्दमासत्तियोगा
दविरलितकपोलं जल्पतोरक्रमेण;
सपुलकपरिरम्भव्यापृतैकैकदोष्णो
रविदितगतयामा रात्रिरेव व्यरंसीत्।

लक्ष्म। एषा पञ्चवट्यां शूर्पणखा।

सीता। हा, अज्जउत्त, एत्तिअंज्जेव दंसणम्।(१)

रामः। अयि, विप्रयोगचकिते, चित्रमेतत्।

सीता। अधा तधा भोदु; दुज्जणो असुहं उप्पादेदि।(२)

---

(१) हा, आर्य्यपुत्र, एतावदेव दर्शनं।

(२) यथा तथा भवतु दुर्जनोऽसुखमुत्पादयति।

Digitized by Google

रामः। हन्त वर्त्तमानदव जनस्थानवृत्तान्तः प्रतिभाति।

लक्ष्म। अथेदं रक्षोभिः कपटहरिणाच्छद्मविधिना,
तथा वृत्तं पापैर्व्यथयति यथा चालितमपि;
जनस्थाने शून्ये विकलकरणैरार्य्यचरितै
रपि ग्रावा रोदित्यपि, दलति वज्रस्य हृदयं।

सीता॥ साक्षमात्मगतम्॥ अद्द देव, रघुकुलानन्द, एवं मम कारणादो क्लिदोसि। (१)

लक्ष्म॥ रामं निर्व्वर्ण्य साकूतं॥ आर्य्य किमेतत्।

अयं ते वाष्पोघस्खुटितदव मुक्तामणिसरो,
विसर्पन् धाराभिर्लुठति धरणीं जर्जरकणः;
निरुद्धोऽप्यावेगः स्फुरदधरनासापुटतया
परेषामुन्नेयो भवति च भराभ्रान्तहृदयः।

रामः। वत्स,

तत्कालप्रियजनविप्रयोगजन्मा
तीव्रोऽपि प्रतिकृतिवाङ्मया विसोढः;
दुःखाग्निर्म्मनसि पुनर्व्विपच्यमानो,
ह्यन्मर्म्मव्रणदव वेदनां करोति। (करोति)

सीता। हद्धी, हद्धी, अहंवि अदिभूमिङ्गदेण रणरणएण अय्यउत्तसुणं विअ अत्ताणं पेक्खामि। (२)

लक्ष्म॥ स्वगतं॥ भवत्वन्यतः क्षिपामि॥ चिरं विलोक्य प्रका

(१) अयि देव, रघुकुलानन्द, एवं मम कारणात् क्लिष्टोऽसि।

(२) हा धिक्, हा धिक्, अहमपि अतिभूमिं गतेन रणरणकेन आर्य्यपुत्रमन्यमिवात्मानं प्रेक्षे।

Digitized by Google

अं॥ तदेतन्मन्थरपुराणप्रसिद्धस्य तत्रभवतस्तातजटायुष स्चरितविक्रमोद्दाहरणं।

सीता। हा तात, निब्बूढो दे अवच्चविणेहो।(१)

रामः। हा तात, काश्यप अरुणराज; क्व पुनस्त्वादृशस्य महतस्तीर्थस्य साधोः सम्भवः।

लक्ष्म। अयमसौ जनस्थानपश्चिमसिचकुञ्जवासाम दनुक वन्धाधिष्ठितो दण्डकारण्यभूभागः; तदिदमस्य मूकपर्व्वतेमतङ्ग स्याश्रमपदं; दृयञ्च अवणा नाम सिन्धुसवरी; तदेतत्पम्पाभि धानं सरः।

सीता। एत्थ किल अज्जउत्तेण विच्छड्डिदामरिसधीर त्तणं पयुक्तकण्ठं रुदिअं आसि।(२)

रामः। देवि, रमणीयमेतत् पम्पासरः;

एतस्मिन् मदकलमल्लिकाख्यपक्ष
व्याधूतस्फुरदुरुदण्डपुण्डरीकाः;
वाष्पाम्भः परिपतनोद्गमान्तराले
संदृष्टाः कुवलयिनो भुवो विभागाः।

लक्ष्म। अयमार्य्यो हनूमान्।

सीता। एसो सो चिरणिव्विसजीअलोअपच्चुद्धरणगुरु ओवआरी महाभाओ मारुदी।(३)

---

(१) हा तात, निर्व्यूढस्ते अपत्यस्नेहः।

(२) अत्र किलार्य्यपुत्रेण विच्छर्दितामर्षधीरत्वं प्रयुक्त कण्ठं रुदितमासीत्।

(३) एष स चिरनिर्व्विसजीवलोकप्रत्युद्धरणगुरुकोप कारी महाभागो मारुतिः।

Digitized by Google

रामः। दिष्ट्या सोऽयं महावाऊरज्जनानन्दवर्द्धनः,

यस्य वीर्य्येण कृतिनो वयञ्च, भुवनानि च।

सीता। वच्छ, एस कुसुमिदकअंवतरुतण्डविदवरहिणो किण्णामधेओ गिरी? जत्थ अणुभावसोहग्गमेत्तपरिसेसधूसर सिरी मुहुत्तं मुच्छन्तो, तुए परुण्णेण अवलम्बिदो तरुअले अज्जउत्तो आलिहिदो। (१)।

लक्ष्म। सोऽयं शैलः ककुभसुरभिर्माल्यवान्नाम, यस्मिन् नीलस्निग्धः श्रयति शिखरं नूतनस्तोयवाहः।

रामः। वत्सैतस्मादिरम विरमाऽतः परं न क्षमोऽस्मि, प्रत्यादृत्तः पुनरपि स मे जानकीविप्रयोगः।

लक्ष्म। अतःपरमार्य्यस्य तत्रभवतां कपिराक्षसानामसंख्यातान्युत्तरोत्तराणि, कर्म्माण्यार्य्याणि, परिश्रान्ता खेयमार्य्या, तदिज्ञापयामि विश्राम्यतामिति।

सीता। अज्जउत्त, एदिणा चित्तदंसणेण पच्चुप्पण्णदोहदाए अत्थि मे विण्णप्पं। (२)।

रामः। नन्वाज्ञापय।

---

(१) वत्स, एष कुसुमितकदम्बतरुतण्डवितवर्हिणः किन्नामधेयोगिरिः? यत्रानुभावसौभाग्यमात्रपरिशेषधूसरश्रीर्मुहूर्त्तं मूर्च्छन्, त्वया प्ररुदितेनावलम्बितस्तरुतले आर्य्यपुत्र आलिखितः।

(२) आर्य्यपुत्रैतेन चित्रदर्शनेन प्रत्युत्पन्नदोहदाया अस्ति मे विज्ञाप्यं।

Digitized by Google

सीता। अज्जे, पुणोवि पसण्णगंभीरासु वणराजिसु विहरिस्सं, पवित्तसोम्मगिम्हिरावगाहां च भगवदीं भाइरहीं अवगाहिस्सं (१)

रामः। वत्स, लक्ष्मण।

लक्ष्म। एषोऽस्मि अचिरं संपादनीयोदोहदहेति, संप्रत्येव गुरुभिरादिष्टं तदनुरूपसुखसंपातं रथमुपस्थापय।

सीता। अज्जउत्त, तुम्हेहिंपि तहिं गंतव्वं। (२)।

रामः। अयि कठिनहृदये, एतदपि युष्माभिरपि वक्तव्यमेव।

सीता। तेण हि पिअं मे। (३)।

लक्ष्म। यथाज्ञापयत्यार्यः॥ इति निष्क्रान्तः॥

रामः। प्रिये, इह वातायनावर्त्तके मुहूर्त्तसंविष्टौ भवावः॥

सीता। एवं भोदु, अवहरिस्सामि क्खु परिस्समजणिदाए णिद्दाए। (४)

रामः। तेन हि तिरश्चारमवलम्बस्व मामेव शयनाय।

जीवयसि व सुधाध्वस्रश्रमखेदविन्दुरधिकण्ठमर्प्यताम्।
बाहुरैन्द्रवमपूस्वभूम्बितस्वन्दिचन्द्रमणिहारविभ्रमः।

(१) जानामि पुनरपि प्रसन्नगम्भीरासु वनराजिषु विहरिष्यामि, पवित्रसौम्यग्रीष्मिरावगाहाञ्च भगवतीं भागीरथीमवगाहिष्ये।

(२) आर्य्यपुत्र, युष्माभिरपि तत्र गन्तव्यं।

(३) तेन हि प्रियं मे।

(४) एवं भवतु अपहरिष्ये खलु परिश्रमजनितया निद्रया।

Digitized by Google

॥ तथा कारयन् सानन्दं ॥ प्रिये, किमेतत्?

विनिश्चेतुं शक्ये न सुखमिति वा दुःखमिति वा
प्रमोहो, निद्रा वा, किमु विषविसर्पः, किमु मदः;
तव स्पर्शे स्पर्शे मम हि परिमूढेन्द्रियगणो,
विकारश्चैतन्यं भ्रमयति, च संमीलयति च।

सीता॥ विदूष॥ स्थिरप्रसादा तुष्टो, ददोदानीं किमपरं वरं? (१)।

रामः।

स्नानस्य जीवकुसुमस्य विकाशनानि,
सन्तर्पणानि सकलेन्द्रियमोहनानि,
एतानि ते सुवचनानि सरोरुहाक्ष्याः,
कर्णामृतानि मनसश्च रसायनानि।

सीता। प्रियंवद, एहि संविशाव (२)।

॥ प्रियनाट्य समन्ततोनिरूपयति॥

रामः। किमन्वेष्टव्यं।

आविवाहसमयाद्गृहे, वने, यौवराज्य, तदनु यौवने पुनः,
स्नापहेतुरनुपाश्रितोऽन्यया, रामवाङ्मयरूपधानमेष ते।

---

(१) स्थिरप्रसादा यूयं, ददत ददानीं किमपरं?

(२) प्रियम्वद, एहि संविशामः।

सीता ॥ निद्रां नाटयन्ती ॥ अत्थि एदं अज्जउत्त; अत्थि एदमिति ॥ स्वपिति ॥ (१)

रामः । कथं प्रियवचना वक्षसि सुप्तैव ॥ निर्व्वर्ण्य सखेदं ॥

दृष्टं गेहे लक्ष्मीरियमनृतवर्त्तिर्नयनयो,

रसावस्याः स्पर्शो वपुषि बहलश्चन्दनरसः,

अयं कण्ठे बाहुः शिशिरमसृणो मौक्तिकसरः

किमस्या न प्रेयो यदि परमसह्यस्तु विरहः ।

॥ प्रविश्य ॥ प्रतीहारी । देव, उपस्थितो (२)।

रामः । अये, कः ?

प्रती । आसन्नपरिचारओ; दुम्मुहो, देवस्स (३)।

रामः ॥ स्वगतं ॥ मुद्धान्तचारी दुर्म्मुखः स मया पौरजानपदानुपसर्पितुं प्रयुक्तः ॥ प्रकाशं ॥ आगच्छतु।

॥ प्रतीहारी निष्क्रान्ता ॥

॥ प्रविश्य ॥ दुर्म्मुखः ॥ स्वगतं ॥ हा, कधं सीदा देव्वए दुद्दिसं अचिन्तणिज्जं अणाववादं देवस्स कधइस्सं; अहवा, णिओओ क्खु मे दुद्दिसो मन्दभाअस्स (४)।

---

(१) अस्ये तत् आर्य्यपुत्रास्येतत्।

(२) देव, उपस्थितः।

(३) आसन्नपरिचारको, दुर्म्मुखो, देवस्य।

(४) हा कथं सीता देव्या दुर्दृशं अचिन्तनीयं अनापवादं देवस्य कथयिष्यामि; अथवा, नियोगः खलु दुर्दृशो मन्दभाग्यस्य।

Digitized by Google

॥ सीता उत्थायते॥ हा आर्यउत्त, सोम्म, कहिंसि? (१)

रामः। अये ममैव रणरणकदायिनी चिरदर्शनादिरह भावना देव्याः, खप्नोद्वेगं करोति॥ सस्नेहं परामृशन्॥

अद्वैतं सुखदुःखयोरनुगुणं सर्व्वास्ववस्थासु य
द्विश्रामो हृदयस्य, यत्र जरसा यस्मिन्नहार्य्यो रसः
कालेनावरणात्ययात्परिणते यत् स्नेहसारे स्थितं,
भद्रं तस्य सुमानुषस्य, कथमप्येकं हि तत्प्राप्यते।

दुर्म्मु ॥ उपसृत्य॥ अय्यदि, अय्यदि, देओ।

रामः। ब्रूहि यदुपलब्धं।

दुर्म्मु। उवत्थवन्ति देवं पौरजाणवदा, विसुमरिदा अम्हे महाराअदसरथस्स रामभद्देणेति (२)।

रामः। अर्थवाद एषः, दोषन्तु कंचित् कथय, येन तत्प्रति विधीयते।

दुर्म्मु॥ सावं ॥ सुणादु देओ। (३)॥ कर्णे एवमेवं।

रामः अहह॥ इति मूर्च्छति॥

---

(१) हा आर्य्यपुत्र, सौम्य, कुत्रासि?

(२) उपस्तुवन्ति देवं पौरजानपदा, विस्मारिता वयं महा राजदशरथस्य रामभद्रेण।

(३) शृणोतु देवः।

Digitized by Google

दुष्मु। आश्वसतु देवी (१)।

रामः॥ आश्वस्त॥

हा हा धिक् परगृहवासदूषणं च
दैवेज्ञाः प्रशमितमद्भुतैरुपायैः,
इतस्तत्पुनरपि दैवदुर्विपाक
दारुणं विषमिव सर्वतः प्रसृप्तम्।

तत्किमत्र मन्दभाग्यः करोमि॥ विस्मृत्य सकरुणं॥ अथवा किमन्यत्।

यताङ्केनापि कार्य्येण लोकस्याराधनं व्रतं
यत्पूरितं हि तातेन मां च प्राणांश्च मुञ्चता।

संप्रत्येव भगवता वसिष्ठेन सन्दिष्टं।

अपिच।

यत्लाविभिर्दीपितं भूमिपालै,
र्लोकश्रेष्ठैः साधु गूढं चरित्रम्,
मत्सम्बन्धात् कश्मला किन्वदन्ती,
स्याचेदस्मिन् हन्त धिङ्मामधन्यं।

हा देवि, देवयजनसम्भवे, हा खजन्मानुग्रहपवित्रितवसुन्धरे, हा मिथिलजनकवंशनन्दिनि; हा पावकवशिष्ठारुन्धतीप्रभृतीक्षणशालिनि; हा राममयजीविते; हा महारण्यवासप्रिय

---

(१) आश्वसतु देवः।

Digitized by Google

सखि ; श्लोकप्रियवादिनि ; कथमेवं विधायास्तवायमीदृशः परिणामः ।

त्वया जगन्ति पुण्यानि, त्वय्यपुण्या जनोक्तयः ;
नाथवन्त्स्त्वया लोकास्त्वमनाथा विपत्स्यसे ।

दुर्मुख ब्रूहि लक्ष्मणं, एष ते नूतनो राजा रामः समाज्ञापयति ॥ कर्ण एवमेवं ॥

दुर्मु । कधं दाणीं अग्गिपरिसुद्धाए गब्भपरिक्खुडिद पवित्तरघुउलसंताणाए देवीए दुज्जणवअणादो, अज्जेण एवं अणज्जं ववसिदं देवेण (१) ।

रामः । आर्य्यं कथं दुर्ज्जनाः पौरजानपदाः ।
दुष्प्राकुवंशोद्भवतः प्रजायां, जातश्च देवाद्दयनीयबीजं,
तथाद्भुतं कर्म विशुद्धिकाले, प्रत्येतु कस्तद्भुवि दूरवृत्तं ।
तद्गच्छ ।

दुर्मु । हा देवि ॥ इति निष्क्रान्तः ॥

रामः । हा कष्टमतिबीभत्सकर्मा नृशंसोऽस्मि संवृत्तः ।
स्नेहवात्प्रभृति पोषितां प्रियैः, सौहृदादपृथगाशयां प्रियां,
कृत्यना परिददामि मृत्यवे, सौनिकोपहृतशकुन्तिकामिव ।

---

(१) कथमिदानीमग्निपरिशुद्धायागर्भपरिस्फुरितपवित्र रघुकुलसन्तानाया देव्या दुर्जनवचनात्, आर्य्येणानार्य्यं व्यवसितं देवेन ।

Digitized by Google

तत्किमस्यार्यमनीषः पातकी देवीं दूषयामि ॥ सीताया: शिरः खेरमुन्नमय्य वाङ्मात्रमाकर्षयन् ॥

अपूर्वकर्मचाण्डालमयि मग्धे विमुञ्च माम्;
श्रितासि चन्दनभ्रान्त्या दुर्विपाकविषद्रुमम् ।

॥ उत्थाय ॥ हन्त विपर्य्यस्तः संप्रति लोकः; पर्य्यवसितं जीवितप्रयोजनं रामस्य, शून्यमधुना जीर्णारण्यं जगत्। असारः संसारः; कष्टप्रायं शरीरं; अमरणस्तु किङ्करोमि, का गतिः; अथवा!

दुःखसंवेदनायैव, रामे चैतन्यमाहितं,
मर्म्मोपघातिभिः प्राणैर्वज्रकीलायितं खिलैः ।

हा अम्ब, अरुन्धति; हा भगवन्तौ विश्वामित्रवसिष्ठौ; हा भगवन् पावक; हा देवि भूतधात्रि; हा तात जनक; हा तात, हा मातरः; हा परमोपकारिन् लङ्काधिपते विभीषण; हा प्रिय सखे सुग्रीव; हा सौम्य हनुमन्; हा सखि त्रिजटे; मुषिता स्थ, परिभूताः स्थ रामहतकेन। अथवा, कस्य तेषामहमिदानीं माक्रोशे।

ते हि, मन्ये, महात्मानः, कृतघ्नेन दुरात्मना,
मया गृहीतनामानः, स्पृश्यन्तइव पाप्मना ।

योऽहम्
विस्रब्धादुरसि निपत्य लब्धनिद्रा=
मुन्मुच्य प्रियगृहिणीं गृहस्य शोभाम्,

Digitized by Google

॥ उत्तरं रामचरितं ॥

आतङ्कस्फुरितकठोरगर्भगर्वो,
क्रव्याद्भ्यो बलिमिव, निर्घृणः क्षिपामि।

॥ सीतायाः मादो शिरसि कृत्वा ॥ देवि, देवि, अयं पश्चिम स्तो रामस्य शिरसा पादपङ्कजस्पर्शमदति ॥ रोदिति ॥

॥ नेपथ्ये ॥ अब्रह्मण्यमब्रह्मण्यम्।

रामः। श्रूयतां भोः किमेतत्।

पुनर्नेपथ्ये। ऋषीणामुग्रतपसां, यमुनातीरवासिनां,
लवणोत्थितः स्तोमः, शरण्यं त्वामुपस्थितः।

रामः। आः कथमद्यापि राक्षसोत्थासः; तद्यावदस्य दुरात्मनः कुम्भीनसीपुत्रस्योन्मूलनाय शत्रुघ्नं प्रेषयामि ॥ कतिचित् पदानि गत्वा, पुनः प्रतिनिवृत्य ॥ हा देवि, कथमेवं गता भविष्यसि? भगवति, वसुन्धरे, साध्वीं दुहितरमवेक्ष्य जानकीं।

जनकानां रघूणाञ्च यत्कृत्यं गोचमङ्गलं,
त्वं देवयजने पुण्ये पुण्यशीलामजीजनः।

॥ इति निष्क्रान्तः ॥

सीता। हा सौम्य, अज्जउत्त, कहिंसि ॥ सहसोत्थाय॥ हद्धी, हद्धी, दुस्सिविणएणविप्पलद्धाहं, अज्जउत्तमाक्कन्दामि। हद्धी, हद्धी, कधमेआणिं मं परिसुत्तं उज्झिऊअ अज्जउत्तो गदो; ता किंदाणिं एदम्? भोदु, कुविस्सं, जदि तं पेक्खन्तो अत्तणो पहविस्सं। को एत्थ परिअणो (१)।

---

(१) हा सौम्य, आर्य्यपुत्र, कुत्रासि? हा धिक् दुःस्वप्नेन

॥ प्रविश्य ॥ दुर्मु । देव, कुमारलक्ष्मणो विज्ञापयति; सज्जो रथो आरुह्यतां देवी (१)।

सीता। दृतं आरुहामि; परिस्फुरतीव मे गर्भभारो, ता सणिअं गच्छह (२)।

दुर्मु। इदो, इदो, देवि।

सीता। णमो णमो तपोधणाणं; णमो णमो रघुकुलदेवदाणं; णमो णमो अय्यउत्तचरणकमलाणं; णमो णमो सयल गुरुअणाणं (३)।

॥ इति निष्क्रान्तौ; चित्रदर्शनो नाम प्रथमोऽङ्कः॥

विप्रलब्धाहं, आर्य्यपुत्रमाक्रन्दामि। हा धिक् हा धिक्, कथमेकाकिनीं मां परिसुप्तामुज्झित्वा आर्य्यपुत्रो गतः; तत्किमिदानीमेतत्? भवतस्तु कुपिष्ये, यदि तं प्रेक्षमाणा आत्मनः प्रभविष्यामि। क्वोऽत्र परिजनः।

(१) देवि, कुमारलक्ष्मणो विज्ञापयति; सज्जो रथः, आरोहतु देवी।

(२) दृतमारोहामि; परिस्फुरतीव मे गर्भभारस्ततः शनैर्गच्छामः।

(३) नमो नमस्तपोधनेभ्यो; नमो नमो रघुकुलदेवताभ्यः, नमो नम आर्य्यपुत्रचरणकमलाभ्यां; नमो नमः सकलगुरुजनेभ्यः।



Digitized by Google

अथ द्वितीयोऽङ्कः।

॥ नेपथ्ये ॥ स्वागतं तपोधनायाः।

॥ प्रविश्य ॥ अध्वनवेशा तापसी। अये वनदेवतेयं फल कुसुमपल्लवार्घेण मामुपतिष्ठते।

॥ प्रविश्य ॥ वनदेवता ॥ अर्घं विकीर्य्य ॥

यथेच्छं भोग्यं वो वनमिदमयं मे सुदिवसः;
सतां सद्भिः सङ्गः कथमपि हि पुण्येन भवति?
तरच्छाया, तोयं, यदपि तपसो योग्यमशनं,
फलं वा, मूलं वा, तदपि न पराधीनमिह वः।

ताप। किमत्रोच्यते?

प्रियप्राया वृत्तिर्विनयमधुरो, वाचि नियमः,
प्रकृष्णा कल्याणी मतिरनवगीतः परिचयः;
पुरा वा, पश्चाद्वा, तदिदमविपर्य्यासितरसं,
रहस्यं साधूनामनुपधि विशुद्धं विजयते।

॥ इत्युपविशतः ॥

वन। कां पुनरत्रभवतीमवगच्छामि?

ताप। आत्रेय्यस्मि।

वन। आत्रेयि, कुतः पुनरिहागम्यते? किंप्रयोजनो वा दण्डकारण्यप्रचारः?

Digitized by Google

आत्रे।

अस्मिन्नगस्त्यप्रमुखाः प्रदेशे भूयांसऽउद्दीप्तविदो वसन्ति;
तेभ्योऽधिगन्तुं निगमान्तविद्यां वाल्मीकिपार्श्वादिह पर्य्यटामि।

वस। यदा तावदन्येऽपि मुनयस्तमेव हि पुराणब्रह्मवादिनं प्राचेतसमृषिं ब्रह्मपाराजयायोपासते, तत्कोऽयमचार्य्याया दीर्घप्रवासप्रयासः।

आत्रे। तच्च महानर्थबलमत्यूहरति, एवहीर्घप्रवासोऽनुज्ञातः।

वस। कीदृशः?

आत्रे। तस्य भगवतः केनापि देवताविशेषेण वर्म्मप्रकारा श्रुतं स्तन्यत्यागमाचक्षे वयसि वर्त्तमानन्हारकङ्कषमुपनीतं; तत् खलु न केवलमृषीणामपि तु सचराचराणां भूतानामान्तराणि तत्तान्युपखेदयति।

वस। अयि, तयोर्नामधेयविशेषमस्ति?

आत्रे। तथैव किल देवतया तयोः कुशलवाविति नामनी प्रभावश्चाख्यातः।

वस। कीदृशः प्रभावः?

आत्रे। तयोः सरहस्यजृम्भकास्त्राणि आजन्मसिद्धानीति।

वस। भोश्चित्रमेतत्!

आत्रे। तौ च भगवता वाल्मीकिना धात्रीकर्म्मवस्तुतः परिगृह्य, पोषितौ, परिरक्षितौ च; कृतचौडकर्म्मणोश्च तयोस्तयो वर्म्मेतरास्त्रविद्यां सावधानेन परिनिष्ठापितौ; समनन्तरञ्च

Digitized by Google

गर्भैकादशे वर्षे चाचेण कल्पेनोपनीय, गुरुणा त्रयीविद्यामध्यापितौ; नम्रेताभ्यामतिप्रदीप्तमेधाप्रज्ञाभ्यामसदादेः सदाध्ययनयोगोऽस्ति, ।

अतः।

वितरति गुरुः प्राज्ञे विद्यां यथैव, तथा जडे,
न च खलु तयोर्ज्ञाने शक्तिं करोत्यपहन्ति वा;
भवति च पुनर्भूयान् भेदः फलं प्रति, तद्यथा
प्रभवति शुचिर्मिग्नोद्वाहे मणिर्न मृदां चयः।

वन। अयमसावध्ययनविघ्नः।

आत्रे। अपरश्च।

वन। अथापरः कः?

आत्रे। अथ स ब्रह्मर्षिरेकदा मध्यंदिनसमये नद्यां तमसामनुप्राप्तः; तत्र युग्मचारिणोः क्रौञ्चयोरेकं व्याधेन विध्यमानं शकुन्तमपश्यत्; आकस्मिकप्रत्यवमार्षाच्च देवीं वाचमव्यतिकीर्णवर्णामनुष्टुभेन छन्दसा परिक्षिप्तामभ्युदैरयत्।

मा, निषाद, प्रतिष्ठां त्वमगमः शाश्वतीः समाः,
यत् क्रौञ्चमिथुनादेकमवधीः काममोहितं।

वन। चित्रमाद्याया दन्यो नूतनश्छन्दसामवतारः।

आत्रे। तेन खलु पुनः समवेतं तं भगवन्तमाविर्भूतब्रह्मप्रकाशमृषिमुपसंक्रम्य भगवान् भूतभावनः पद्मयोनिरवोचत्; ऋषे, प्रबुद्धोऽसि वाल्मीकिरसि ब्रह्मणि, तद्ब्रूहि रामचरितमार्यस्तवज्योतिरार्षेण प्रतिभां चक्षुः; आद्यः कविरसीत्युक्तः, तच्चे

Digitized by Google

वाल्मीकिनः। अथ भगवान् प्राचेतसः, प्रथमं मनुष्येषु ब्रह्म लक्ष्मणस्याहमं विवर्त्तमितिहासं रामायणमृषिः प्रणिनाय।

वन। हन्त, तर्हि पण्डितः संसारः।

आत्रे। तस्मादवोचन्नदनुरीधानस्तच हि महाध्ययन प्रत्यूहदृति।

वन। युज्यते।

आत्रे। विश्रान्तासि, भद्रे, संप्रत्यगस्त्याश्रमस्य पन्थानं ब्रूहि।

वन। इतः पञ्चवटीमनुप्रविश्य, गम्यतामेतेन गोदावरी तीरेण।

आत्रे॥ सवाष्पं॥ अयेतत्तपोवनं, अयेषा पञ्चवटी, अयि सरिदियं गोदावरी, अयमयं गिरिः प्रस्रवणः, अपि जनस्थान देवता वासन्ती मं?

वास। अस्येतत् सर्व्वं।

आत्रे। वत्से जानकि!

स एष ते वल्लभबन्धुवर्गः प्रासङ्गिकीनां विषयः कथानां;
मां नाम शेषामपि वर्त्तमानां प्रत्यक्षदृश्यामिव नः करोति।

वास ॥ सभयं॥ कथं नाम शेषामित्याह? आर्य्ये, किमत्याहितं सीता देव्याः?

आत्रे। न केवलमत्याहितं; सापवादमपि॥ कर्षे एवमेवं॥

वास। अहह दारुणो दैवनिर्घातदृति॥ मूर्च्छति॥

आत्रे। भद्रे, समाश्वसिहि, समाश्वसिहि।

वास। हा प्रियसखि, हा महाभागे, दुर्दृष्टस्ते निर्म्माणभागः

रामभद्र, रामभद्र, अथवा अलं त्वया। आर्ये आत्रेयि, अथ तस्मादरण्यात् परित्यज्य, निवृत्ते लक्ष्मणे, सीता देव्याः किं वृत्तमिति कापिदस्ति प्रवृत्तिः?

आत्रे। नहि, नहि।

वास। हा कष्टमरुन्धतीवशिष्ठाधिष्ठितेषु, रघुकुलकदम्बकेषु जीवन्तीषु, प्रवृद्धराज्ञीषु, कथमिदं जातं?

आत्रे। लक्ष्मणस्तूष्णीमासने गुरुजनसदासीत्; सन्नति परिसमाप्तं तद्वादशवार्षिकं सत्रं, लक्ष्मणेन च संपूज्य, विसर्जिता गुरवः। ततो भगवत्यरुन्धती नाहं वधूविरहितामयोध्यां गमिष्यामीत्याह; तदेव राममाद्यभिरनुमोदितं; तदनुरोधाद्भगवतो वशिष्ठस्य परिग्रहेण वाचो, यथा वाल्मीकितपोवनं गता, तच्च वक्ष्यामहति।

वास। अथ स राजा किमाचारः सन्नति?

आत्रे। तेन राज्ञा क्रतुरश्वमेधः प्रक्रान्तः।

वास। अहह, धिक् परिणीतमपि भ्रान्तं, भ्रान्तं! का तर्हि यज्ञे सहधर्मचारिणी?

आत्रे। हिरण्मयी सीताप्रतिकृतिः।

वास। हन्त भोः!

वज्रादपि कठोराणि, मृदूनि कुसुमादपि,
लोकोत्तराणां चेतांसि, को नु विज्ञातुमर्हति?

आत्रे। विसृष्टस्य वामदेवानुमन्त्रितो मेधोऽश्वः, उप

कल्पितास्त्र यथाम्नायं तस्य रचितारः, तेषामधिष्ठाता तस्य चात्मजस्त्रकेतुरवाप्तदिव्यास्त्रबलदर्पस्त्र, याधनाश्वितोऽनुप्रहितः।

वास ॥ सखेहकौतुकाक्षं॥ कुमारलक्ष्मणस्यापि पुत्रः; हन्त मातर्जीवामि, जीवामि।

आत्रे। अथान्तरे, प्राप्तक्षेत्र, मृतं पुत्रमारोप्य राजद्वारि, वीरबाहुजनन्यश्रुक्षुमुद्घोषितं; ततो न राजापराधमन्तरेण प्रजावामकालमृत्युस्तरतीत्यात्मदोषं निरूपयति, करुणामये रामभद्रे, सहसैवान्तरीक्षे वागुदचरत्;

अम्बूको नाम शूद्रः पृथिव्यां तपते तपः,
शीर्षच्छेदः स ते राम, तं हत्वा जीवय द्विजं।

इत्युपश्रुत्यैवाजातकृपाणपाणिः, पुष्पकं विमानमारुह्य, सर्वान् द्विजो विदित्वा शूद्रतापसाम्वेषणाय, जगत्पतिश्चरितु मारब्धवान्।

वास। शूद्रः अम्बूको नाम धूमपो, ऽस्मिन्नेव जनस्थाने तपस्त रतीति तदपि नाम रामभद्रः पुनरपीदं वनमलंकुर्य्यात्।

आत्रे। भद्रे, गम्यते ऽधुना।

वास। आर्य्ये, आत्रेयि, एवमस्तु कठोरीभूतस्तु; दिवसः। तथाहि।

कण्डूयादिपनष्टपिष्टकषयोत्क्षेपैव, सम्पातिभि
र्मर्म्मस्पंचितनम्भनैः स्वकुलजैरर्चन्नि गोदावरीं।

Digitized by Google

छायापक्किरमाचविष्किरमुखव्याक्षट्टकीटलवः,
कूजत्कालकपोतकुक्कुटकुलाः कूले कुलायद्रुमाः ।

॥ इति निष्क्रान्ते ॥ विष्कम्भकः ॥

॥ ततः प्रविशति सदशोद्यतखड्गो रामभद्रः ॥

हे दण्ड दण्डित, हतस्य शिरोर्दितस्य
जीवातवे, विसृज मूढमुनौ कृपाणं ।
रामस्य गात्रमसि, दुर्व्वहगर्भखिन्न
सीताप्रवासनपटोः, करुणा कुतस्ते?

॥ अथ कथञ्चित् प्रहृत्य ॥ कृतं रामसदृशं कर्म्म; अपि जीवेत् स ब्राह्मणसुतः ।

॥ प्रविश्य ॥ दिव्यपुरुषः । जयति जयति देवः ।

दत्ताभये, त्वयि यमादपि दण्डधारे,
यज्जीवितः शिशुरयं, मम चेयमृद्धिः ।
अम्बूक एष शिरसा चरणौ नतस्ते;
सत्यङ्कृजानि निधनान्यपि तारयन्ति ।

रामः । इदमपि प्रियं नः; तदनुभूयतामुग्रतपसः फलं ।

यत्तानन्दास्रु, मोदास्रु, यच्च पुण्याभिषेकजलाः
वैराजा नाम ते लोकास्तेजसाः सन्तु ते शिवाः ।

अम्बू । युष्मत्पादप्रसादेनोपाय एष महिमा; किमत्र तपसः फलं? अथवा महदुपकृतं तपसा ।

Digitized by Google

अन्वेष्टव्यो यदपि भुवने भूतनाथः श्मशानो,
मामन्विष्यन्निह वृषलकं, योजनानां शतानि
क्रान्त्वा, प्राप्तः, स इह तपसां सम्भवाद्दो, ऽन्यथा चेत्,
कायोध्यायाः पुनरुपगमो दण्डकायां वने वः।

रामः। किन्नाम दण्डकेयं॥ सर्व्वतोऽवलोक्य॥ आं कथं?

स्निग्धश्यामाः क्वचिदपरतो भीषणाभोगरूक्षाः,
स्थाने स्थाने मुखरककुभो द्राक्कृतैर्निर्झराम्भः।
एते तीर्थाश्रमगिरिसरिद्गर्भकान्तारमिश्राः,
संदृश्यन्ते परिचितमुखा दण्डकारण्यभागाः।

अम्बू। दण्डकैवेयमत्र किल निवसता देवेन,

चतुर्दश सहस्राणि चतुर्दशच राक्षसाः,
त्रयश्च दूषणखरत्रिमूर्द्धानो, निपातिताः।

येन, सिद्धचेतोजनस्थाने मादृशानामपि भीरुजनपदानाम कुतोभयः सञ्चारो जातः।

रामः। न केवलं दण्डकेयं, किन्तु जनस्थानमपि?

अम्बू। बाढमेतानि खलु सर्व्वभूतलोमहर्षणान्युन्मत्तचण्ड श्वापदकुलसङ्कुलगिरिगह्वराणि जनस्थानपर्य्यन्तानि, दीर्घार ण्यानि दक्षिणां दिशमभिवर्त्तन्ते।

तथाहि।

निष्कूजस्तिमिताः क्वचित्, क्वचिदपि प्रोच्चण्डसत्त्वस्वना:,
स्वेच्छासुप्तगभीरघोरभुजगश्वासप्रदीप्ताग्नयः;

Digitized by Google

सीमानः प्रदरोदरेषु विलसत्खड्गाभसो याखयं
दृष्यद्भिः प्रतिसूर्य्यकैरजगरखेदद्भवः पीयते।

रामः। पश्यामि च जनस्थानं भूतपूर्व्वखरालयं।
प्रत्यक्षमिव दृष्टान्तान् पूर्व्वानुभवामि च।

॥ सर्व्वतोऽवलोक्य ॥ प्रियारामाहि सर्व्वथा वैदेह्याशीत्। एतानि तानि नाम कान्तारादि! किमतः परं भयानकस्य ॥ आकं॥

त्वया सह निवत्स्यामि वनेषु मधुगन्धिषु;
इति चारमतीवासौ स्नेहस्नसाः स तादृशः।
अकिञ्चिदपि कुर्व्वाणः सौख्यैर्दुःखान्यपोहति,
तत्तस्य किमपि द्रव्यं, यो हि यस्य प्रियो जनः?

अम्बू। तदलमेभिर्दुरासदैः। अथैतानि मदकलमयूरकेकाकोमलकलविभिरवकीर्णानि पर्व्वतैरविरलनिविष्टनीलवहलच्छायतरुणतरुखण्डमण्डितान्यसंभ्रान्तविविधमृगयूथानि, पश्यतु महानुभावः, प्रशान्तगभीराणि मध्यमारण्यकानि।

दृष्ट्वा समदशकुन्ताक्रान्तवानीरवीरु
त्प्रसवसुरभिशीतस्वच्छतोया वहन्ति,
फलभरपरिणामश्यामजम्बूनिकुञ्ज
स्खलनमुखरभूरिस्रोतसो निर्झरिण्यः।
दधति कुहरभाजामत्र भल्लूकयूना
मनुरसितगुरूणि स्थानमभ्यूहतानि

Digitized by Google

स्निग्धिरकटुकषायः स्वाद्यते शल्लकीना
मिभदलितविकीर्णन्यग्रोधनिष्यन्दगन्धः।

रामः॥ सर्वाण्यस्त्रं॥ शिवास्ते पन्थानः; देवयानं प्रति पद्यस्व पुण्येभ्यो लोकेभ्यः।

अम्बू। यावत् पुराणब्रह्मवादिनमगस्त्यमृषिमभिवाद्य शाश्वतं पदमनुप्रविशामि॥ इति निष्क्रान्तः॥

रामः। एतत्तदेव हि वनं पुनरद्य दृष्टं,
यस्मिन्नभूम चिरमेव पुरा वयस्याः;
आरण्यकास्य गृहिणश्च रताः स्वधर्मे,
सांयात्रिकेषु च सुखेषु वयं रसज्ञाः।

अपिच।

एते तएव गिरयो विरुवन्मयूरा
स्तान्येव मत्तहरिणानि वनस्थलानि,
आमञ्जुवञ्जुलतानि च तान्यमूनि;
नीरन्ध्रनीलनिचुलानि सरित्तटानि।
मेघमालेव यस्यायमाराद्पि विभाव्यते,
गिरिः प्रस्रवणः सोऽयं, यत्र गोदावरी नदी।
श्लक्ष्णैवासीन्महति शिखरे गृध्रराजस्य वास
स्तस्याधस्ताद्यमपि रतास्तेषु पर्णोटजेषु।
गोदावर्याः पयसि विनतश्यामलानोकहश्री
रन्तः कूजन्मुखरशकुनो यत्र रम्यो वनान्तः।

Digitized by Google

तदेव सा पञ्चवटी, यत्रातिचिरनिवासेन विविधविच्छ
त्तातिप्रसङ्गसाक्षिणः प्रदेशाः प्रियायाः, प्रियसखी च वासन्ती
नाम वनदेवता प्रतिवसति। तत् किमिदमापतितमद्य रामस्य
॥ यद्यति हि ॥

चिरोद्वेगारम्भी प्रसृतइव तीव्रो विषरसः,
कुतश्चित्सम्वेगाच्चिहितइव भ्रष्टस्य भ्रकुटेः;
व्रणो रूढग्रन्थिः स्फुटितइव हृन्मर्मणि पुन
र्घनीभूतः शोको विकलयति, संमूर्च्छयति च।

तथापि तान् पूर्वसुहृदो भूमिभागान् पश्यामि ॥ निरूप्य ॥
अहो अनवस्थितोभूमिसंनिवेशः।

पुरा यत्र स्रोतः पुलिनमधुना तत्र सरितां,
विपर्य्यायं यातो घनविरलभावः चितिरुहां।
वहोर्दृष्टं कालादपरमिव मन्ये वनमिदं;
निवेशः शैलानां तदिदमिति बुद्धिं दृढयति।

हन्त, परिहरन्नपि मामितः पञ्चवटीप्रदेशो बलादाकर्षती
व ॥ सकरुणं ॥

यस्यान्ते दिवसास्तया सह मया नीता यथा स्वेच्छया
यस्मन्निष्कथाभिरेव सततं दीर्घाभिरास्थीयते।
एकः सम्प्रति तामितप्रियतमस्तामद्य, रामः, कथं
पापः पञ्चवटीं विलोकयतु वा, गच्छत्वसम्भावनां।

Digitized by Google

॥ प्रविश्य प्रस्तूकः ॥ जयति देवः । देव, भगवानगस्त्यो मन्त्रः श्रुतभवत्संविधानस्यामाह । परिकल्पितविमानावतरणसज्जा प्रतीक्षते वत्सला लोपामुद्रा, सर्व्वे चागस्त्याश्रमादेहि, सन्ध्या वयास्यान्, अथ प्रजविना पुष्पकेण स्वदेशमुपगम्याश्वमेधाय सज्जो भविष्यसीति ।

रामः । यथाज्ञापयति भवान् ।

प्रस्तूः । दूतस्तर्हि देवः प्रवर्त्तयतु पुष्पकं ।

रामः । भगवति पञ्चवटि, गुरुजनोपरोधात् चलं चलता मतिक्रमो रामस्य ।

प्रस्तूः । देव, पश्य, पश्य ;

कूजत्कुञ्जकुटीरकौञ्चिकघटाघुत्कारवत्कीचक
स्तम्बाडम्बरमूकमौकुलिकुलः क्रौञ्चावतोऽयं गिरिः ।
एतस्मिन् प्रचलाकिनां प्रचलतामुद्वेजिताः कूजिते
रुद्वेल्लन्ति पुराणरोहिणतरुष्कन्धेषु कुम्भीनसाः ।

अपिच ;

एते ते कुहरेषु गह्वरनदद्रोदावरीवारयो,
मेघाम्बलितमौलिनीलशिखराः शैलीभूतो दक्षिणाः ;
अन्योन्यप्रतिघातसङ्कुलचलत्कोलकोलाहले
रुद्धाशास्त इमे गभीरपयसः पुण्याः सरित्सङ्गमाः ।

॥ दूति निष्क्रान्ताः सर्व्वे ॥ द्वितीयोऽङ्कः ॥

Digitized by Google

॥ अथ तृतीयोऽङ्कः ॥

॥ ततः प्रविशति नदीद्वयं तमसा मुरला च ॥

तमसा। वत्सि मुरले, किमसि संभ्रान्तेव?

मुरला। भगवति तमसे, प्रेषितास्मि भगवतोऽगस्त्यस्य पत्न्या लोपामुद्रया सरिद्वरां गोदावरीमभिधातुं; जानासेव यथा वधूत्यागात् प्रभृति,

अनिर्भिन्नगभीरत्वादन्तर्गूढघनव्यथः,
पुटपाकप्रतीकाशो रामस्य करुणो रसः।

तेन च तथाविधेष्टजनकष्टविनिपातजन्मना प्रकर्षगतेन दीर्घशोकसन्तापेन संप्रत्यतितरां परिक्षीणो रामभद्रः; तमेव शोकं, कम्पितमिव मे हृदयं; अधुना च प्रतिनिवर्त्तमानेन रामभद्रेण नियतमेव पञ्चवटीवने वधूसहनिवासविस्रम्भसाक्षिणः प्रदेशा द्रष्टव्याः; तेषु च, निसर्गधीरस्यापेवंविधायामवस्थायामतिगम्भीराभोगशोकक्षोभसम्वेगात्, पदे पदे महान्ति प्रमादस्खलानानि शङ्कनीयानि रामभद्रस्य। तद्भगवति गोदावरि, तत्र त्वया सावधानया भवितव्यं।

वीचीवातैः शीकरक्षोदशीतैराकर्षद्भिः पद्मकिञ्जल्कगन्धान्।
मोहे मोहे रामभद्रस्य जीवं खेदं खेदं प्रेषितैस्तर्पयेति।

Digitized by Google

तम। उचितमेव दाक्षिण्यं स्नेहस्य; सञ्जीवनोपायस्तु मौलिकएव रामभद्रस्याद्य सन्निहितः।

मुर। कथमिव?

तम। श्रूयतां; पुरा किल वाल्मीकितपोवनोपकण्ठात् परित्यज्य, गते लक्ष्मणे, सीता देवी प्राप्तप्रसववेदनात्मानमति दुःखसंवेगाद्भागीरथीप्रवाहे निक्षिप्तवती।

मुर। तदैव, तच्च दारकद्वयं प्रसूता भगवतीभ्यां पृथ्वी भागीरथीभ्यामभ्युपपन्ना रसातलञ्च गीता; स्वन्यत्यागात् परेण च, सुतद्वयं तस्याः, प्राचेतसस्य महर्षेर्गङ्गादेवी स्वयमर्पितवती।

दुर्दृष्टानां विपाकोऽपि जायते पावनाद्भुतः,
यत्रोपकरणीभावमायात्येवंविधो जनः।

तम। इदानीन्तु ग्रस्तूकबधवृत्तान्तेनानेन सम्भावितजनस्थानगमनं रामभद्रं सरयूमुखादुपश्रुत्य, भागीरथी, यदेव भगवत्या स्नेहामृतया स्नेहादाग्रहितं, तदेवाग्रहात्, सीता स्वमेतां केनचिदिव गृहाचारव्यपदेशेन गोदावरीं विलोकयितुमागता।

मुर। सुविचिन्तितं भगवत्या; राजधानीस्थितस्य खलु तस्येदृगतामाभ्युदयिकैः कार्यैर्व्याकुलस्य रामभद्रस्य निद्यता स्मृतिविक्षेपाः; अव्यग्रस्य पुनरस्य शोकमाचर्वितोपस्य पञ्चवटीप्रवेशो महाननर्थदृति; तत्कथमिदानीं सीतादेव्या रामभद्र आश्वासनीयः स्यात्।

Digitized by Google

तम। उक्तमद्य भगवत्या भागीरथीदेव्या; वत्से, देवय जनसम्भवे सीते, अद्य खल्वायुष्मतोः कुशलवयोर्द्वादशजन्म संवत्सरस्य सङ्क्रामकुलपञ्जिरभिवर्त्तते; तदात्मनः पुराण श्वशुरमेतावतो मानवस्य राजर्षिवंशस्य प्रसवितारं सवितार मपहृतपाप्मानं देवं, खहस्तावचितैः पुष्पैरुपतिष्ठस्वेति। ननु स्नानवनिपृष्ठवर्त्तिनोमस्नानभावादनदेवता अपि न दृश्यन्ति कं पुनर्मर्त्याः। अहञ्च ज्ञापिता तमसे; त्वयि प्रहृष्टप्रेमैव वधू र्वत्सा जानकीति, अतस्त्वमेवास्याः प्रत्यन्तरीभवेति; साहमधुना यथादिष्टमनुतिष्ठामि।

मुर। अहमप्यमुं वृत्तान्तं भगवत्यै लोपामुद्रायै निवे दयामि; रामभद्रोऽप्यागत एवेत्याशङ्कते।

तम। तदियं, गोदावरीह्रदान्निष्क्राम्य

परिपाण्डुदुर्ब्बलकपोलसुन्दरं
दधतो विलोलकवरीकमाननं,
करुणस्य मूर्त्तिरथ, वा शरीरिणी,
विरहव्यथेव वनमेति जानकी।

मुर। दृश्यते सा।

किसलयमिव मुग्धं बन्धनाद्विप्रयुक्तं।
हृदयकुसुमशोषी दारुणो दीर्घशोकः।
क्षपयति परिपाण्डुश्यामलाः शरीरं।
शरदिजइव घर्मः केतकीगर्भपत्रं।

Digitized by Google

॥ परिक्रम्य निष्क्रान्ते ॥ विष्कम्भकः ॥

॥ नेपथ्ये ॥ प्रमादः ;

॥ ततः प्रविशति पुष्पावचयव्यग्रहस्ता सकरुणौत्सुक्यमाकर्णयन्ती सीता।

सीता। अज्जहे, जाणामि पिअसही मे वासन्ती वाहरदि (१)।

॥ नेपथ्ये ॥

सीतादेव्याः स्वकरकलितैः प्रत्यहं पल्लवाद्यै
रग्रे सोदः करिकरभको यः पुरा पोषितोऽभूत्!

सीता। किं ततः?

॥ पुनर्नेपथ्ये ॥

बध्वा सार्द्धं पयसि विहरन्, सोऽयमन्येन वेगा
दुद्दामेन द्विरदपतिना सन्निपत्याभियुक्तः।

सीता ॥ ससंभ्रमं कतिचित् पदानि दत्वा ॥ अज्जउत्त, परित्ताहि, परित्ताहि, मम तं पुत्तअं विचिन्त्य। हद्धी, हद्धी; तादिज्जेव चिरपरिचिदाइं अक्खराइं पञ्चवटीदंसणेण मं मन्दभाइणीं अणुवन्धन्ति; हा अज्जउत्त ॥ इति मूर्च्छति ॥(२)।

---

(१) आर्य्ये; जानामि प्रियसखी मे वासन्ती व्याहरति।

(२) आर्य्यपुत्र, परित्रायस्व, परित्रायस्व, मम तं पुत्रकं विचिन्त्य। हा धिक्, हा धिक, तान्येव चिरपरिचितान्यक्षराणि पञ्चवटीदर्शनेन मां मन्दभागिनीं अनुबध्नन्ति; हा आर्य्यपुत्र।

Digitized by Google

॥ प्रविश्य तमसा ॥ वत्से समाश्वसिहि, समाश्वसिहि।

नेपथ्ये। अयि विमानराज, अत्रैव स्थीयतां।

सीता ॥ ससाध्वसोत्कम्पोल्लासं ॥ अम्मदे, जलभरितमेघस्तनित गम्भीरमांसलो कुदो णु एसो भारदी णिग्घोसभरन्तकण्ण विवरं मं पि मन्दभाइणीं मुहत्ति उल्लावेदि (१)?

तम ॥ सस्नेहास्यं॥

किमन्यत्रेऽपि निजदे कुतस्ते प्रीतिरीदृशी,

स्तनयित्नोर्मयूरीव चकितोत्कण्ठिता स्थिता।

सीता। भअवदि, किं भणासि, अपरिप्फुटन्ति मए उण सरसम्बोएण पच्चभिआणिदं, अज्जउत्तो ज्जेव वाहरदि (२)।

तम। श्रूयते तपस्वतः शूद्रस्य दण्डधारणार्थमेष्वाकी राजा जनस्थानमागतइति।

सीता। दिट्ठिआ अपरिहीण रामधम्मो खलु सो राआ (३)।

---

(१) जलभृतमेघस्तनितगम्भीरमांसलः कुतो नु एष भारती निर्घोषभ्रियमाणकर्णविवरां मामपि मन्दभाग्यां सहित्यु च्छ्वासयति।

(२) भवति, किं भणसि, अपरिस्फुटमिति मया पुनः स्वर संयोगेन प्रत्यभिज्ञातं आर्यपुत्र एव व्याहरति।

(३) दिष्ट्या अपरिहीनराजधर्मः खलु स राजा।

Digitized by Google

नेपथ्ये ॥

यत्र द्रुमा अपि सृगा अपि बन्धवो मे,
यानि प्रियासहचरस्थिरमन्थवासं ;
एतानि तानि वनभूमिरकन्दराणि,
गोदावरीपरिसरस्य गिरेस्तटानि ।

सीता । हा कथं प्रभातचन्द्रमण्डलापाण्डुरपरिक्षामदुर्ब्बलेण आआरेण; अज्जं सौम्यगम्भीरानुभावमत्तपच्चभिआणिओ, अज्जउत्तो, एव; ता मं धारेहि (१)

॥ इति तमसामाश्लिष्य मूर्च्छति ॥

तम ॥ धारयन्ती ॥ वत्से, समाश्वसिहि, समाश्वसिहि ।

॥ नेपथ्ये ॥ अनेन पञ्चवटीदर्शनेन

अन्तर्लीनस्य दुःखाग्नेरयोद्दामं ज्वलिष्यतः,
उत्पीडइव धूमस्य, मोहः प्रागावृणोति मां ।

तम ॥ स्वगतं ॥ इदं तदाशङ्कितं गुरुजनेनापि ।

सीता ॥ समाश्वस्य, ॥ हा कथं एदं ।

॥ पुनर्नेपथ्ये ॥ हा देवि, दण्डकारण्यवासप्रियसखि, हा देवि, विदेहराजपुचि ॥ इति मूर्च्छति ॥

---

(१) हा कथं प्रभातचन्द्रमण्डलापाण्डुरपरिक्षामदुर्ब्बलेणाकारेणार्यं सौम्यगम्भीरानुभावमात्रप्रत्यभिज्ञात, आर्य्य पुत्र, एव ; तस्मान्मां धारय ।

Digitized by Google

सीता। हद्धी, हद्धी; मं मन्दभाइणिं उद्दिश्य, आमीलन्ननेत्तणीलुप्पलो मुहिदो व्वेव्व हा। हा, कधं धरणीवट्टे णिरुस्सासणीसहं विपल्लत्थो। भअवदि तमसे, परित्तायहि, परित्तायहि; जीवावेहि, जीवावेहि अज्जउत्तं॥ इति पादयोः पतति॥ (१)।

तम। त्वमेव ननु कल्याणि सञ्जीवय जगत्पतिं;
प्रियस्पर्शोहि पाणिस्ते, तत्रैव निरतो जनः

सीता। जंभोदु, तंभोदु; जधा भअवदी भणादि (२।

॥ सर्वभ्रमं निष्क्रान्ता॥

॥ ततः प्रविशति भूमौ निपतितः, सास्रया सीतया स्पृश्यमानः, सास्रादोच्छ्वासो, रामभद्रः॥

सीता ॥ किञ्चित्सहर्षखगतं॥ जाणे पुणोवि पच्चागदं विअ जीविदं तेलोक्कणाहस्स (३)

रामः। हन्त भोः किमेतत्!

---

(१) हा धिक् हा धिक्, मां मन्दभागिनीमुद्दिश्य, आमीलन्ननेत्रोत्पलो मूर्च्छितएव। हा हा, कथं धरणीपृष्ठे निरुच्छ्वास निस्सहं विपर्य्यस्तः। भगवति तमसे, परित्रायस्व, परित्रायस्व; जीवय, जीवयार्य्यपुत्रं।

(२) यद्भवतु, तद्भवतु; यथा भगवती भणति।

(३) जाने पुनरपि प्रत्यागतमिव जीवितं त्रैलोक्यनाथस्य।

Digitized by Google

प्रस्योतनन्तु हरिचन्दनपल्लवानां
निर्व्यीडितेन्दुकरकन्दलजोनुषेकः,
आतप्तजीवितमनःपरितर्पणो मे
सञ्जीवनौषधिरसो नु हृदि प्रसिक्तः।
स्वप्नः, पुरा परिचितो, नियतं स एष
सञ्जीवनस्य मनसः, परिमोहनस्य;
सन्तापजां सपदि यः प्रतिहत्य मूर्छा
मानन्दनेन जडतां पुनरातनोति।

सीता॥ सणाध्वसोत्कम्पमुपसृत्य॥ एत्तिकंज्जेव्व मे दाणिं वज्जरं (१)।

रामः॥ उपविश्य॥ न खलु वत्सलया सीतादेव्या अभ्युपपन्नोऽस्मि?

सीता। हद्धी हद्धी, किन्ति; मं अज्जउत्तो मग्गिस्सदि (२)।

रामः। भवतु; पश्यामि।

सीता। भअवदि तमसे, ओसरम्ह; जदि दाव मं पेक्खिस्सदि, तदो अणणुण्णादसंविधाणेण अहिअं पि मम महाराआ कुप्पिस्सदि (३)।

---

(१) एतावदेव मे इदानीं वक्तव्यं।

(२) किमिति, मामार्य्यपुत्रो मार्गिष्यति।

(३) भगवति तमसे, अपसरावः; यदि तावत् मां प्रेक्षिष्यते ततोऽनभ्यनुज्ञातसन्निधानेनाधिकमपि मम राजा कुपिष्यति।

Digitized by Google

तम। अधि वत्से, भागीरथीवरप्रसादादनदेवतानामप्य संदृश्या संवृत्तासि।

सीता। अां अत्थि एदं? (१)

रामः। प्रिये जानकि, ननु प्रिये जानकि।

सीता॥ समन्युगद्गदं॥ अज्जउत्त, असरिसं खु एदं दुमस्सु वुत्तन्तस्सु॥ साखं॥ अहवा, किंत्ति वज्जमइं जम्मन्तरेसुवि पुणो असभाविददुल्लहदंसणं मं व्वेव्व मन्दभाइणीमुद्दिश्य,वच्छलस्सु एवंवादिणो अज्जउत्तस्सु उवरि, कधं णिरणुक्कोसा भविस्सं? अहं एदस्सु हिअअं जानामि, ममावि एसोत्ति (२)।

रामः॥ सर्व्वतो विलोक्य सनिर्वेदं॥ हा न कश्चित्।

सीता। भअवदि तमसे, तदा णिक्कारणपरिट्ठाइणोवि एदस्सु, एदिणा एवंविधेण दंसणेण, कीदिसो विअ मे हिअआणुवन्धोत्ति, ण आणामि, ण आणामि (३)।

---

(१) अां अस्त्येतत्।

(२) आर्य्यपुत्र, असदृशं खल्वेतदेतस्य वृत्तान्तस्य। अथवा, किमिति वज्रमयीं जन्मान्तरेष्वपि पुनरसम्भावितदुर्लभदर्शनां मामेव मन्दभागिनीमुद्दिश्य, वत्सलस्यैवंवादिन आर्य्यपुत्रस्योपरि, कथं निरनुक्रोशा भविष्यामि? अहमेतस्य हृदयं जानामि, ममाप्येष इति।

(३ भगवति तमसे, तदा निष्कारणपरित्यागिनोऽप्येतं

तम। जानामि वत्से, जानामि।

तटस्थं नैराश्यादपि च कलुषं विप्रियवशा
द्वियोगे दीर्घेऽस्मिन्, स्फुटति घटनोन्मुखमिव;
प्रसन्नं सौजन्यादपि तु करुणैर्गाढकरुणं,
द्रवीभूतं प्रेम्णा तव हृदयमस्मिन् क्षणइव।

रामः। देवि।

प्रसादइव मूर्त्तस्ते स्पर्शस्नेहाईशीतलः;
अद्याप्येवार्द्रयति मां; त्वं पुनः कासि निर्दयि?

सीता। एदे खलु दे अगाधदंसिदसिणेहसंभारा आणंदणिस्संदिणो सुदा मए अज्जउत्तस्स उल्लावा, आवे पच्चएण, णिक्कारणपरिच्चाअणिक्खिदो वि वल्लहदो मे जम्मलाओ (१)।

रामः। अथवा कुतः प्रियतमा? नूनं सङ्कल्पाभ्यासपाटवो त्पादितएष रामभद्रस्य भ्रमः!

॥ नेपथ्ये ॥ प्रसादः प्रसादः ॥ सीता देव्याः स्वकरकलितैरि त्यर्द्धं पठ्यते।

तस्यैवंविधेन दर्शनेन, कीदृशइव हृदयानुबन्धइति, न जा नामि।

(१) एते खलु ते अगाधदर्शितस्नेहसम्भाराः आनन्दनिष्य न्दिनः श्रुता मया आर्यपुत्रस्योल्लापाः, येषां प्रत्ययेन, निष्कारण परित्यागक्षिप्तोऽपि वल्लभतो मे जन्मलाभः।

Digitized by Google

रामः ॥ सकरुणोत्सुकं ॥ किं तत्र ?

॥ पुनर्नेपथ्ये ॥ वध्वा सार्द्धमित्युत्तरार्द्धं पठ्यते।

सीता। को दाणिं अहिउज्झिस्सदि? (१)।

रामः। कासौ, कासौ दुरात्मा, यः प्रियायाः पुरुषं वधू द्वितीयमभिभवति ॥ इत्युत्तिष्ठति॥

॥ प्रविश्य संभ्रान्ता वासन्ती॥ कथं, देवो रघुनन्दनः।

सीता। कधं, पिअसही मे वासन्ती (२)।

वासन्तिका। जयति जयति देवः।

रामः ॥ निरूप्य ॥ कथन्देव्याः प्रियसखी वासन्ती।

वासं। देव, लर्ष्यतां, लर्ष्यतां। इतो जटायुगिरिशिखरस्थ दक्षदक्षिणेन, सीतातीर्थेन, गोदावरीमवतीर्य्य सम्भावयतु, देव्याः पुरुषं देवः।

सीता। हा ताद, जटाओ, सूणं तए विणा जणट्ठाणं (३)।

रामः। अहह हृदयमर्म्मच्छिदः खल्वमी कथोद्घाताः।

वासं। इतइतो देवः।

सीता। भअवदि, सरुअं ज्जेव, वणदेवदा वि मं ण पेक्खदि(४)।

---

(१) कदरदाणीं अभिमोक्ष्यते?

(२) कथं प्रियसखी मे वासन्ती।

(३) हा तात, जटायो, शून्यं त्वया विना जनस्थानं।

(४) सत्यं, वनदेवतापि न मां प्रेक्षते।

Digitized by Google

तम। अयि वत्से, सर्व्वदेवताभ्यः प्रलब्धमैश्वर्य्यं मन्दाकिनी देव्याः, तत्किमाशङ्कसे?

सीता। तदो अणुसरसु॥ इति परिक्रामतः॥ (१)

रामः। भगवति गोदावरि, नमस्ते।

वासं। देव, देव, मोदस्व, विजयिना वधूद्वितीयेन देव्याः पुत्रकेण।

रामः। विजयतां आयुष्मान्।

सीता। अज्जउत्ते, दिट्ठिसो एस संवुत्तो (२)।

रामः। महादेवि, दिष्ट्या वर्द्धसे।

येनोद्गच्छदिषीकशैलयवसिग्रन्थ्यङ्कुरेण, ध्यानदृष्टे, सुतनु, लवलीपल्लवः कर्णपूरात्,
सोऽयं पुत्रस्तव मदमुषां वारणानां विजेता, जातः कल्याणं वयसि तरुणे भाजनं तस्य जातः।

सीता। अविउत्तो दाणीं अअं दीहाऊ इमाए सोम्मदंसणाए समं भोदु (३)।

रामः। सखि वासन्ति, पश्य पश्य, कान्तानुवृत्तिचातुर्य्यमप्यनुचिन्तितं वत्सेन।

---

(१) ततोऽनुसरावः।

(२) आर्य्ये, दिष्ट्या एष संवृत्तः।

(३) अवियुक्त इदानीमयं दीर्घायुरनया सौम्यदर्शनया समं भवतु।

Digitized by Google

दहति हृदयं गाढोद्वेगो, द्विधा तु न भिद्यते;
वहति विकलः कायो मोहं, न मुञ्चति चेतनां;
ज्वलयति तनूमन्तर्दाहः, करोति न भस्मसात्;
प्रहरति विधिर्मर्मच्छेदी, न छिनत्ति जीवितं।

सीता। एवमेतत्।

रामः। हे भवन्तः पौरजानपदाः।

न किल भवतां स्नानं देव्या गृहेऽभिमतं, तत
स्तृणमिव वने शून्ये त्यक्ता, न वाप्यनुशोचिता
चिरपरिचितास्ते ते भावाः परिद्रवयन्ति मा
मिदमशरणैरद्याप्येवं प्रसीदत रुद्यते।

तमसा। अतिगम्भीरमवगूरणं शोकसागरस्य।

वासं। देव, अतिक्रान्ते धैर्यमवलम्ब्यतां।

रामः। सखि, किमुच्यते धैर्यमिति।

देव्या शून्यस्य जगतो द्वादशः परिवत्सरः,
प्रणष्टमिव नामापि न च रामो न जीवति।

सीता। सोहिदम्हि अज्जउत्तस्स एदाहिं वअणेहिं (१)।

तमसा। एवं वत्से।

नैताः प्रियतमा वाचः स्नेहार्द्राः शोकदारुणाः,
एताः सेमधुनो धाराः स्रोतन्ति सविषास्त्वयि।

---

(१) शोभितास्मि आर्य्यपुत्रस्यैतैर्वचनैः।

Digitized by Google

रामः। अयि खलु वाचलि, मया

यथा तिरश्चीनमलातप्रखं प्रत्युप्तमन्तः सविषस्य दंशः,
तथैव तीव्रो हृदि शोकशङ्कुर्मर्माणि दग्धस्यपि किन्न सोढः।

सीता। एवंहि मन्दभाइणो पुणोवि आआसकारिणो अज्जउत्तस्स (१)।

रामः। एवमतिनिष्क्रम्यसम्भिताक्तःकरणस्यापि मम, संस्तुतवज्रतरप्रियदर्शनादुद्दामोऽयमावेगः।

सोढोढोऽसुभितकरुणो जृम्भथस्तम्भनार्थं,
यो यो यत्नः कथमपि मया धीयते तन्मनन्दः;
भित्वा भित्वा प्रसरति बलात् कोऽपि चेतोविकार
स्तोयस्येवाप्रतिहतरयः सैकतं सेतुमोघः।

सीता। एदिणा अज्जउत्तस्स दुव्वारदारुणारम्भेण दुःख संक्खोहेण, पप्फुरिदणिअदुःखं विअ, आकंपिदं मे हिअअम् (२)।

---

(१) एवमस्मि मन्दभाग्या पुनःपुनरायासकारिणी आर्य्य पुत्रस्य।

(२) एतेनार्य्यपुत्रस्य दुर्व्वारदारुणारम्भेण दुःखसंक्षो भेण, प्रस्फुरितनिजदुःखमिवाकम्पितं मे हृदयं।

Digitized by Google

वासं॥ खगतं॥ कष्टमभ्यापन्नो देवः; तदन्यतः चिपामि तावत्॥ प्रकाशं॥ चिरपरिचितानामिदानीं जनस्थानभागानामवलोकनेनात्मानमानन्दयतु देवः।

रामः। एवमस्तु॥ दत्युत्थाय परिक्रामति॥

सीता। सन्दीवणादेंण्णेव दुःखस्सु पिअसही विणादणो वाओत्ति मण्णेदि (१)।

वासं॥ सकरुणं॥ देव, देव;

अस्मिन्नेव लतागृहे त्वमभवस्तन्मार्गदत्तेक्षणः,
सा हंसैः क्षिरकौतुका चिरमभूद्गोदावरीरोधसि;
आयान्त्या परिदुर्मनायितमिव त्वां वीक्ष्य, बन्धुस्तया,
कातर्यादरविन्दकुड्मलनिभो मुग्धः प्रणामाञ्जलिः।

सीता। दारुणासि, वासन्दि, दारुणासि; जा एदेहिं हिअअमम्मगूढअक्खरेहिं पुणो पुणो मं मन्दभाइणीं अज्ज उत्तं वि दूमावेसि (२)।

---

(१) सन्दीपनान्येव दुःखस्य प्रियसखो विनोदनोपाय इति मन्यते।

(२) दारुणासि, वासन्ति, दारुणासि या एतैर्हृदयमर्म्म, गूढाक्षरसदृशैः पुनः पुनर्मां मन्दभाग्यां आर्य्यपुत्रमपि दुनोषि।

Digitized by Google

रामः। चण्डि जानकि, दूतस्तेऽहमस्मीव, मचानुरूपमसे।

हा हा देवि, स्फुटति हृदयं, ध्वंसते देहबन्धः,
शून्यं मन्ये जगदविरतं ज्वालमन्तर्ज्वलामि;
सीदन्नेतन्मयि विधुरो मज्जतीवान्तरात्मा
विष्वग्मोहः स्थगयति, कथं मन्दभाग्यः करोमि।

॥ इति मूर्च्छति॥

सीता। हद्धी, हद्धी; पुणोवि पमूढो अज्जउत्तो (१)।

वासं। देव समाश्वसिहि, समाश्वसिहि।

सीता। हा अज्जउत्त, मं मन्दभाइणीं उद्दिसिअ, सअल लोअलोअमङ्गलाधारस्स दे जम्मलाहस्स वारंवारं संसइद जीविदकारुणो दसापरिणामोत्ति; हा हदस्मि (२)।

॥ इति मूर्च्छति॥

तम। वत्से समाश्वसिहि समाश्वसिहि,। पुनस्त्वयाप्यस्मिन्नेव सञ्जीवनोपायो रामभद्रस्य।

वासं। कथमद्यापि नोच्छ्वसिति; हा प्रियसखि सीते, क्वासि; सम्भावयात्मनो जीवेश्वरं।

---

(१) हा धिक्, हा धिक्, पुनरपि प्रमूढ आर्य्यपुत्रः।

(२) हा आर्य्यपुत्र, मां मन्दभाग्यामुद्दिश्य, सकलजीव लोकमङ्गलाधारस्य तेजन्मलाभस्य वारंवारं संशयितजीवित कारुणो दशापरिणाम; इति हा हतास्मि।

Digitized by Google

॥ सीता सवंभ्रममुपसृत्य हृदि सखाटे च स्पृशति ॥

वासं। दिष्ट्या प्रत्यापन्नचेतनो रामभद्रः।

रामः। आश्लिष्यन्नमृतमयैरिव प्रलेपै

रन्तर्वा, बहिरपि वा, शरीरधातून्,

संस्पर्शः पुनरपि जीवयन्नकस्मा

दानन्दादपरविधं तनोति मोहं।

आनन्दनिमीलिताक्षएव; सखि वासन्ति, दिष्ट्या वर्द्धसे।

वासं। देव कथमिव?

रामः। सखि किमन्यत्; पुनः प्राप्ता जानकी।

वासं। अपि देव रामभद्र क्व सा?

रामः॥ स्वर्गसुखमनुभूय॥ पश्य, नन्दियं, पुरतएव,

वासं। अयि देव, किमिति मर्म्मच्छेददारुणैरतिप्रलापैः प्रिय सखीं दुःखदग्धामपि मां पुनर्म्मन्दभागिनीं दहसि।

सीता। ओसक्किदुमिच्छामि; एसो उण चिरसन्तावसोसणी अणेण अज्जउत्तफंसेण, दीहदारुणं विअ सन्तावं करन्तेण, वज्ज सेवोवणिवडेणविअ; णिव्वन्तणीसहविपडिवत्तवेअणीओ अवसो विअ मे हत्थो (१)।

---

(१) अपसर्त्तुमिच्छामि एष पुनश्चिरसन्तापशोषणीत येनार्य्यपुत्रस्पर्शेन, दीर्घदारुणमिव सन्तापं कुर्वता, वज्रेण

रामः। सखि, कुतः प्रलापाः।

गृहीतो यः पूर्वं परिणयविधौ कङ्कणधर
स्थिरं खेलास्पर्शैरमृतमणिभिरैर्यः परिचितः,

सीता। अज्जउत्तो सोअ्ज्जेव्व दाणीं सि तुमं (१)।

रामः। स एवायं तस्यास्तुहिननिकरैरायस्यसुभगो,
मया लब्धः पाणिर्वलितलवलीकन्दलनिभः।

॥ इति मूर्च्छति ॥

सीता। हद्धी, हद्धी, अज्जउत्तफंसमोहिदाए ममादो क्खु संवुत्तो (२)।

रामः। सखि वासन्ति, आनन्दनिमीलितेन्द्रियः साध्वसेन परवानस्मि; तत्त्वं तावदेनामवधारय।

वासं। कष्टमुन्मादएव।

॥ सीता ससंभ्रममाचिष्यापसर्पति ॥

रामः। हा धिक् प्रमादः, हा धिक् प्रमादः;

पोषनिबद्धइव, सञ्चमाननिःसहविपर्य्यस्तवेपनश्लोऽवशइव मे हस्तः।

(१) आर्य्यपुत्र स एवेदानीमसि त्वं।

(२) हा धिक्, हा धिक, आर्य्यपुत्रस्पर्शमोहितायाःप्रमादः खलु संवृत्तः।

Digitized by Google

करपल्लवः स तस्याः सहसैव जडात् जडः परिभ्रष्टः,
परिकम्पिनः प्रकम्पी करात्मम खिद्यतः खिद्यन्।

सीता। हद्धी हद्धी; अज्जवि अणवत्थिदत्थिमिदमूढघुण्णमाणणअणो ण पज्जवत्थावेदि अप्पाणअं (१)।

तम॥ सखेदं निर्वर्ण्य॥

सखेदरोमाञ्चितकम्पिताङ्गी जाता प्रियस्पर्शवशेन वत्सा,
मरुन्नवाम्भःप्रविधूतसिक्ता कदम्बयष्टिः स्फुटकोरकेव।

सीता। अम्महे, अवसेण एदेण अत्ताणएण लज्जाविदम्हि भअवदीए तमसाए; किंत्ति किल एसा मण्णिस्सदि; एसो परिच्चाओ, एसो अहिस्संगोत्ति (२)।

रामः॥ सर्वतोऽवलोक्य॥ कथं नास्त्येव, नन्वकरुणे वेदेहि;

सीता। सच्चं अकरुणम्हि, जा एवंविधं तुमं पेक्खन्ती धरामि ज्जेव जीअं (३)।

---

(१) अद्यापि अनवस्थितस्तिमितमूढघूर्णमाननयनो न पर्य्यवस्थापयति आत्मानं।

(२) विस्मये, अवशेनैतेनात्मना लज्जापिताऽस्मि भगवत्या तमसायाः; किमिति किलैषा मंस्यते; एष परित्यागः एषोऽभिष्वङ्ग इति।

(३) सत्यमकरुणाऽस्मि, या एवम्विधं त्वां प्रेक्षमाणा धरा ज्येव जीवं।

Digitized by Google

रामः। क्षमस्व, प्रसीद देवि; न मामेवंविधं परित्यक्तुमर्हसि।

सीता। अहं अज्जउत्त विपरीतं विअ (१)।

वासं। देव, प्रसीद, प्रसीद॥ खेनैव लोकोत्तरेण धैर्य्येण संस्तभ्यातिभूमिंगतविप्रलम्भमात्मानं। कुतोऽत्र प्रियसखी मे सीता?

रामः। व्यक्तं नास्ति; कथमन्यथा वासन्त्यपि तां न पश्येत्; अपि खलु स्वप्नएष स्यात्। न चास्मि प्रसुप्तः; कुतो वा रामस्य निद्रा? सर्व्वथा स एवैष भगवाननेकवारपरिकल्पितनिर्म्मितो विप्रलम्भपुनःपुनरनुबध्नाति।

सीता। मएज्जेव दारुणाए विप्पलद्धो अज्जउत्तो (२)।

वासं। देव, पश्य, पश्य;

पौलस्त्यस्य जटायुषा विघटितः काष्ण्यार्यसोऽयं रथः;

पश्यैते पुरतः पिशाचवदनाः कङ्कालशेषाः खराः;

खड्गच्छिन्नजटायुपक्षतिरितः सीतां ज्वलन्तीं वह

न्नन्तर्व्याकुलविद्युदम्बुदइव श्यामभ्युदस्यादरिः।

सीता ॥ सभयं॥ अज्जउत्त, तादो वावादीअदि, अहं च अवहरीआमि; परित्ताहि, परित्ताहि (३)।

---

(१) आर्य्यपुत्र विपरीतमिव।

(२) मयैव दारुणया विप्रलब्धआर्य्यपुत्रः।

(३) आर्य्यपुत्र, तातो व्यापाद्यते, अहञ्चापह्रियें, परित्रायस्व, परित्रायस्व।

Digitized by Google

लीलोत्खातमृणालकाण्डकवलच्छेदेषु सम्पातिता,
पुष्यत्पुष्करवासितस्य पयसो गण्डूषसंक्रान्तयः;
येकः श्रीकरिणा करेण विहितः कामं विरामे पुन
र्यत्स्नेहादनरालनालनलिनीपत्रातपत्रं धृतं।

सीता। भअवदि तमसे, अअन्हाव दूदिसो, दे उण ण आणामि कुसलवा एत्तिएण कालेण कीदिसाविअ होन्ति (१)।

तम। यादृशोऽयं, तादृशौ तावपि।

सीता। दूदिसी अहं मन्दभाइणी, जाए ण केवलं णिरन्तरं अज्जउत्तविरहो, पुत्तविरहोवि (२)।

तम। भवितव्यतेयमीदृशी।

सीता। किंवा मए पसूदाए, जेण तादिसंपि मम पुत्त काणं दूसिविरलकोमलधवलदसणुज्जलकवोलं अणुबद्धमुद्ध काअलीविहसिदं णिबद्धकाकसिरुण्डअं अम्मलमुहपुण्डरीअ जुअलं, ण परिचुम्बिअं अज्जउत्तेण (३)।

---

(१) भगवति तमसे, अयं तावदीदृशौ पुनर्न जानामि कुशलवावेतावता कालेन कीदृशाविव भवतः।

(२) दूदृशी अहं मन्दभागिनी, यस्यान केवलं निरन्तर मार्य्यपुत्रविरहः, पुत्रविरहोऽपि।

(३) किम्वा मया प्रसूतया, येन तादृशमपि मम पुत्रयो

Digitized by Google

तम। अस्तु देवताप्रसादात्।

सीता। भअवदि तमसे, एदिणा अवच्चसंसुमरणेण उच्छुसिद पसुदत्थणी, ताणं च पिदुणो सण्णिधाणेण खणमत्तं संसारि णिस्सि संवुत्ता (१)।

तम। किमन्योच्यते। प्रसवः खलु प्रकर्षपर्य्यन्तः स्नेहस्य परमं, चैतदन्योन्यसंश्लेषणं पित्रोः।

अन्तःकरणतत्त्वस्य द्रव्यत्योः स्नेहसंश्रयात्,
आनन्दयन्निरेकोऽयमपत्यमिति बध्यते।

वासं। इतोऽपि देवः पश्यतु।

अतरुणमदताम्रवोत्सवाग्रे
व्यथमचिरोद्गतमुग्धशोणवर्हैः,
मणिमुकुट इवोच्छ्रितः कदम्बे
नदति स एष वधूसखः शिखण्डी।

रोवदिरत्तकोमलधवलदन्तोच्चत्तकपोलमणुवट्टमुग्ध काक सीविहसितं णिवट्टकाकणिखण्डकमणलमुखपुण्डरीकयुगलं, ण परिचुम्बितमार्य्यपुत्तेण।

(१) भगवति तमसे, एतेनापत्यसंस्मरणेन उच्छ्वसित प्रसुतस्तनी, तयोश्च पितुः सन्निधानेन क्षणमात्रं संसारिण्यस्मि सम्वृत्ता।

Digitized by Google

सीता ॥ सकौतुकास्यं ॥ एसो सो, एसो सो (१)।

रामः। वत्स मोदस्व।

सीता। एवं भोदु।

रामः। भ्रमिषु क्षतपुटान्तर्मण्डलादृत्तचक्षुः,
प्रचलितचतुरभ्रूताण्डवैर्मण्डयन्त्या,
करकिसलयतालैर्मुग्धया नर्त्यमानं,
सुतमिव मनसा त्वां वत्सलेन स्मरामि।

हन्त तिर्य्यञ्चोऽपि परिचयमनुरुध्यन्ते।

कतिपयकुसुमोद्गमः कदम्बः
प्रियतमया परिवर्द्धितो य आसीत्।

सीता ॥ निरूप्य सास्रं ॥ सुट्ठ पच्चभिण्णादं अज्जउत्तेण (२)।

रामः। स्मरति गिरिमयूरएष देव्याः
खजनदत्तवाच यतः प्रमोदमेति।

वासं। अत्र तावदासनपरिग्रहं करोतु देवः।

एतत्तदेव कदलीवनमध्यवर्त्ति
कान्तासखस्य शयनीयमिलातलस्य।
अत्र स्थिता हरिणदारुजुगो यदेभ्यः,
सीता, ततो हरिणकैर्न विमुच्यते स्म।

---

(१) एष सः एष सः।

(२) सुट्ठु प्रत्यभिज्ञातमार्य्यपुत्रेण।

Digitized by Google

रामः। इदं तावदशक्यमेव द्रष्टुम् इत्यन्यतो मुखमुपावर्तते ॥

सीता। सहि वासंदि, किं तए कदं अज्जउत्तस्स, मम च एदं दंसअन्तीए। हद्धी हद्धी, सोअ्येव अज्जउत्तो, तंअ्येव पञ्चवटीवणं, साअ्येव पञ्चवटी, साअ्येव वासन्ती, तेअ्येव विविह विस्सम्भसाक्खिणो गोदावरीकाणणुद्देसा, तेअ्येव आदण्णिव्वि सेसा मअपक्खिपादवा, साअ्येव चाहं; मए उण मन्दभाइणीए दीसन्तंपि सव्वंअ्येव एदं णट्ठंति; ता ईदिसो जीअलोअस्स परिवत्तो (१)।

वासं। सखि सीते, कथं न पश्यसि रामस्यावस्थां।

कुवलयदलस्निग्धैरङ्गैर्दृशौ नयनोत्सवं
सततमपि ते स्वेच्छादृश्यो नवो नवएव यः,
विकलकरणः पाण्डुः सोऽयं शुचा परिदुर्बलः,
कथमपि सदृत्युक्षेतव्यस्तथापि दृशोः प्रियः।

---

(१) सखि वासन्ति, किं त्वया कृतं आर्य्यपुत्रस्य मम चैतद् दर्शयन्त्या। हा धिक्, हा धिक्, स एवार्य्यपुत्रः, तदेव पञ्चवटीवनं, सैव वासन्ती, तएव विविधविस्रम्भसाक्षिणो गोदावरीकाननो देशास्तएव जातनिर्विशेषा मृगपक्षिपादपाः, सा चैवाहं; मम पुनर्मन्दभाग्याया दृश्यमानमपि सर्व्वमेवैतन्नास्तीति; तदीदृशो जीवलोकस्य परिवर्त्तः।

Digitized by Google

सीता। पेक्खामि, सहि, पेक्खामि (१)।

तम। सखि पश्यन्ती प्रियं भूयाः।

सीता। हा देव्व, एसा मए विणा, अहं पि एदेण विणेत्ति, सिविणेवि केण सम्भाविदं आसि। ता मुहुत्तकं पि, जम्मन्तरादो विअ अणुलद्धदंसणा, वाहसलिलंतरेसु पेक्खामि दाव वच्छलं अज्जउत्तं॥ इति पश्यति॥ (२)

तम॥ सस्नेहाङ्गं परिष्वज्य॥

विलुलितमतिपूरैर्वाष्पमानन्दशोक
प्रभवमवसृजन्ती दृष्णयोत्तानदीर्घा,
क्षपयति हृदयेशं स्नेहनिस्यन्दिनी ते,
धवलवहलमुग्धा दुग्धकुल्येव दृष्टिः।

वासं। दहतु तरवः पुष्पैरर्घं फलैश्च मधुच्युतः,
स्फुटितकमलामोदप्राया: प्रवान्तु नवानिलाः,
कलमविरलं रत्युत्कण्ठाः क्वणन्तु शकुन्तयः,
पुनरिदमयं देवो रामः स्वयं वनमागतः।

---

(१) प्रेच्चे, सखि, प्रेच्चे।

(२) हा दैव एष मया विना अहमप्येतेन विनेति, स्वप्नेऽपि केन सम्भावितमासीत्। तन्मुहूर्त्तकमपि, जन्मान्तरादिव अनुलब्धदर्शना, बाष्पसलिलान्तरेषु प्रेक्षे तावदत्यलमार्य्य पुत्रं।

Digitized by Google

रामः। एहि, सखि वासन्ति, नन्दितः श्रोतव्यः।

वासं ॥ उपविश्य सास्रं ॥ महाराज, अपि कुशलं कुमार लक्ष्मणस्य ?

रामः ॥ अश्रुतिमभिनीय ॥

करकमलवितीर्णस्तुतीवारभ्यै ०तीर्णैः०
स्तरुणकुलिकुरङ्गान् मैथिली वानपुष्यत्,
भवति मम विकारक्षेषु दृष्टेषु कोऽपि,
द्रवदव हृदयस्य प्रस्तरोद्भेदयोग्यः।

वासं। महाराज, ननु पृच्छामि, अपि कुशलं कुमार लक्ष्मणस्येति।

रामः ॥ स्वगतं ॥ अये महाराजेति निष्प्रणयमामन्त्रणपदं, सौमित्रिमाचे च वाष्पस्खलिताक्षरः कुशलानुप्रश्नस्तथा मन्ये विदितसीतावृत्तान्तेयमिति ॥ प्रकाशं ॥ आः कुशलं कुमारस्येति ॥ रोदिति ॥

वासं। अयि देव, किमिति दारुणो, दारुणः खल्वसि।

सीता। सखि वासन्ति, किं तुमं सि एवंवादिणी; पिअसहीए खु सव्वस्स अज्जउत्तो विसेसदो मम पिअसहीए (१)।

---

(३२) सखि वासन्ति, किमसि एवंवादिनी; प्रियसखीः खलु सर्वस्यार्यपुत्रो विशेषतो मम प्रियसखायाः।

Digitized by Google

वासं। त्वं जीवितं, त्वमसि मे हृदयं द्वितीयं,
त्वं कौमुदी नयनयोरमृतं त्वमङ्गे।
इत्यादिभिः प्रियशतैरनुरुध्य मुग्धां;
तामेव शान्तमथवा किमिहोत्तरेण?

॥ इति मूर्छति ॥

रामः। स्थाने, खलु वाक्यनिवृत्तिर्मोहस्य, सखि। समाश्वसिहि, समाश्वसिहि।

वासं॥ समाश्वस्य॥ तत्किमिदमकार्य्यमनुष्ठितं देवेन?

सीता। सहि वासन्हि विरम (१)।

रामः। लोको न म्रियतीति।

वासं। तत्कस्य हेतोः।

रामः। सएव जानाति किमपि।

तम। चिरादुपालब्धः।

वासं। अयि कठोर यशः किल ते प्रियं,
किमयशो ननु घोरमतः परं;
किमभवद्विपिने हरिणीदृशः;
कथय नाथ, कथं वत मन्यसे?

सीता। तुमंज्जेव, सहि वासंदी, दारुणा कठोरा अ, जा एवं पलीवेसि (२)।

---

(१) सखि वासन्ति विरम।

(२) त्वमेव सखि, दारुणा कठोरा च, या एवं प्रदीपयसि।

Digitized by Google

तम। प्रणयएवायं व्याहरति शोकस्य।

रामः। सखे, किमत्र मन्तव्यं।

अलकहायनकुरङ्गविलोलदृष्टे
स्तस्याः परिस्फुरितगर्भभरालसायाः,
ज्योत्स्नामयी च मृदुमुग्धमृणालकल्पा
कस्याङ्गिरङ्गलतिका निरतं प्रसूना।

सीता। अज्जउत्त, धरामि, एसा धरामि (१)।

रामः। हा प्रिये जानकि, क्वासि।

सीता। हद्धी, हद्धी, अज्जउत्तोवि पमुक्ककण्ठं रुण्णो (२)।

तम। वत्से, सांप्रतिकमेवैतत् कर्त्तव्यानि दुःखितैर्दुःख निर्व्यापणानि, यतः।

पूरोत्पीडे तडागस्य परीवाहः प्रतिक्रिया,
शोकक्षोभे च हृदयं प्रलापैरेव धार्य्यते।

विशेषतो रामभद्रस्य बहुतरप्रकारकष्टो जीवलोकः।

इदं विश्वं पाल्यं विधिवदभियुक्तेन मनसा,
प्रियाशोको जीवं कुसुममिव घर्मः क्लमयति;
स्वयं हत्वा त्यागं, विलपनविनोदोऽप्यसुलभ
स्तदद्याप्युच्छ्वासो भवति, ननु लाभो विरुदितं।

रामः। कष्टं भोः कष्टं।

---

(१) आर्य्यपुत्र धरामि एषा धरामि।

(२) हा धिक्, हा धिक्, आर्य्यपुत्रोऽपि प्रमुक्तकण्ठं रुदितः।

Digitized by Google

रामः ॥ सवेगमुत्थाय ॥ आः पाप, तातप्राणसीतापहारिन्, क्व यासि।

वासं। अपि देव राक्षसकुलप्रलयधूमकेतो, अद्यापि ते मन्युविषयः।

सीता। अज्जो उम्मत्तिअसि संवुत्ता (१)।

रामः। अन्यथवायमधुना प्रलापो वर्त्तते।

उपायानां भावादविरतविनोदव्यतिकरै
र्विमर्दैर्वीराणां, जगति जनितात्यद्भुतरसः;
वियोगो मुग्धाक्ष्याः स खलु रिपुघातावधिरभूत्
कथं तूष्णीं सद्यो निरवधिरिदानीन्तु विरहः?

सीता। णिरवधित्ति; हा हदस्सि मन्दभाइणी (२)।

॥ इति रोदिति ॥

रामः। हा कष्टं।

व्यर्थं यत्र कपीन्द्रसख्यमपि मे, वीर्य्यं हरीणां वृथा,
प्रज्ञा जाम्बवतोऽपि, यत्र न गतिः पुत्रस्य वाचोरपि,
मार्गं यत्र न विश्वकर्मतनयः कर्त्तुं नलोऽपि क्षमः,
सौमित्रेरपि पत्रिणामविषयस्तत्र प्रिये क्वासि मे?

---

(१) अज्जो उम्मत्तासि संवुत्ता।

(२) णिरवधिरिति हा हताऽस्मि मन्दभागिनीति।

सीता। वज्ज माणाधिदम्हि तं पुव्वविरहं (१)।

रामः। यदि वाचलि, सुहृदामिदानीं दुःखायैव राम दर्शनं किंचिरं त्वां रोदयिष्यति; तदनुजानीहि मां गमनाय।

सीता॥ सोदेगमोहं तमसामवलम्ब्य॥ भगवदि तमसे, गच्छदिज्जेव अज्जउत्तो (२)।

तम। वत्से, समाश्वसिहि समाश्वसिहि; नन्वावामप्यायुषतोः कुशलवयोर्व्वर्धवर्द्धनमङ्गलानि सम्पादयितुं भागीरथी पदान्तिकमेव गच्छावः।

सीता। भगवदि प्रसीद, क्षणमेत्तंपि दाव दुल्लहं अज्जं पेक्खामि (३)।

रामः। अस्ति चेदानीमप्यमेधाय सहधर्मचारिणी मे।

सीता॥ सगदं॥ अज्जउत्त, का?

रामः। हिरण्मयी सीतायाः प्रतिकृतिः।

सीता॥ सोच्छायं सासं॥ अज्जउत्तो दाणीं वि तुमं अणुहे, उक्खादिदं दाणीं मे परिच्चाअलज्जासहं अज्जउत्तेण (४)।

---

(१) वज्ज मानाधितास्मि तं पूर्व्वविरहं।

(२) भगवति तमसे, गच्छत्येवार्य्यपुत्रः।

(३) भगवति प्रसीद, क्षणमात्रमपि तावत् दुर्लभं जनं प्रेक्षे।

(४) आर्य्यपुत्र, दृढाभोसि त्वं। उत्खातमिदानीं मे परित्यागलज्जाप्रक्षमार्य्यपुत्रेण।

Digitized by Google

रामः। तथापि तावदाप्यदिग्धं चक्षुर्विनोदयामि।

सीता। धण्णा सा जा अज्जउत्तेण वङ्कमणा अहि; जा अज्जउत्तं विणोदअन्ती, आआणिबन्धणं जादा जीअलोअस्स (१)।

तम॥ सस्मितस्नेहाक्षं परिष्वज्य॥ अयि वत्से, एवमात्मा स्तूयते।

सीता॥ सलज्जमधोमुखी स्वगतं॥ परिहसिदम्हि भअवदीए तमसाए (२)।

वासं। महानयं व्यतिकरोऽस्माकं प्रमादः॥ गमनं प्रति॥ पुनर्यथा कार्यहानिर्न भवति, तथाऽस्तां।

सीता। पडिकूला दाणिं मे वासन्ती संवुत्ता (३)।

तम। वत्से एहि गच्छावः।

सीता॥ सकष्टं॥ एवं करेम्ह (४)।

तम। कथं वा गम्यते? यस्यास्तव,

---

(१) धन्या सा आर्य्यपुत्रेण वङ्क मन्यते या आर्य्यपुत्रं विनोदयन्ती आत्मानिबन्धनं जाता जीवलोकस्य।

(२) परिहसितास्मि भगवत्या तमसया।

(३) प्रतिकूलेदानीं मे वासन्ती संवृत्ता।

(४) एवं कुर्मः

प्रत्युप्तेव हृदिते दृष्टादीर्घस्य चक्षुषः,
मर्मच्छेदपरेर्यन्नैराकर्षी न समाप्यते।

सीता। णमो णमो अकिदपुण्णजणादंसणीआणं अज्जउत्त चरणकमलाणं (१)।

॥ इति मूर्च्छति ॥

तम। वत्से, समाश्वसिहि, समाश्वसिहि।

सीता ॥ समाश्वस्य ॥ कियच्चिरं वा मेहन्तरेण पुण्णिमाचन्दस्स दंसणं (२)।

तम। अहो संविधानकं।

एको रसः करुणएव, निमित्तभेदा
द्भिन्नः, पृथक् पृथगिवाश्रयते विवर्त्तान्।
आवर्त्तबुद्बुदतरङ्गमयान्विकारा
नम्भो यथा सलिलमेव तु तत्समग्रं।

रामः। अयि विमानराज दूतदूतः ॥ इति सर्व्वे उत्तिष्ठन्ति ॥

॥ तमसावासन्धौ सीतारामौ प्रति ॥

---

(१) नमो नमोऽकृतपुण्यजनादर्शनीययोरार्य्यपुत्रचरणकमलयोः।

(२) कियच्चिरं वा मेघान्तरेण पूर्णिमाचन्द्रस्य दर्शनं।

Digitized by Google

अवनिरमरसिन्धुः सार्द्धमस्मद्विधाभिः,
स च कुलपतिराद्यश्छन्दसो यः प्रयोक्ता,
स च मुनिरनुयातारुन्धतीको वशिष्ठ
स्त्वयि वितरतु भद्रं भूयसे मङ्गलाय ।

॥ इति निष्क्रान्ताः सर्व्वे ॥

॥ छाया नाम तृतीयाऽङ्कः ॥

Digitized by Google

अथ चतुर्थोऽङ्कः।

ततः प्रविशत्यात्रेयी।

एकः। सौधातके, दृश्यतामद्य भूयिष्ठसंनिधापितातिथिजनस्य समधिकारम्भरभणीयता भगवतो वाल्मीकेराश्रमपदस्य; तथाहि;

नीवारोद्दलनश्रमेण मधुरं, सद्यः प्रसूताप्रिया,
पीतादप्यधिकं तपोवनमृगः पर्य्याप्तमाचामति।
गन्धेन स्फुरता मनागनुसृतो भक्तस्य सर्पिष्मतः,
कर्कन्धूफलमिश्रशाकपचनामोदः परिस्फीर्य्यते।

सौधा। आत्रेयं अणज्झायकारणं सविसेसभूदमज्ज जीणकुचाणं (१)।

प्रथमः॥ विदूषकः॥ अपूर्वः कोऽपि वर्द्धमानहेतुर्गुरुषु, सौधातके।

सौधा। भो भण्डायण, किंणामधेओ एसो दाणीं महत्तस्स त्थविरसत्थस्स धुरन्धरो, अज्ज अदिधी आअदो (२)।

(१) आगतमनध्यायकारणं सविशेषभूतमद्य जीर्णकूर्चाणां।

(२) भो भाण्डायन, किन्नामधेय एष इदानीं महतः स्थविरसार्थस्य धुरन्धरश्चातिथिरागतः।

Digitized by Google

भाण्डायनः। धिक् प्रहसनं, नन्वयमस्मद्गात्रमादृत्य तीपुरक्षतान् महाराजदशरथस्य द्वारानधिष्ठाय, भगवान् वसिष्ठः प्राप्तस्तत्किमेवं प्रलपसि?

सौधा। ॐ वसिट्ठो (१)।

भाण्डा। अथ किं।

सौधा। मए उण जाणिदं वग्घो वा, विग्घो वा, एसोत्ति(२)।

भाण्डा। आं, किमुक्तं भवति?

सौधा। तेण परावडिदेणज्जेव सा वराइआ कत्तोडिआ मडमडाइदा (३)

भाण्डा। यमांशो मधुपर्कदृत्याद्यायं वत्स मन्यमानाः श्रोत्रियायाभ्यागताय वत्सतरीं, महोक्षं वा महाजं वा, निर्वपन्ति गृहमेधिनः। तं हि धर्मसूचकारः समामनन्ति।

सौधा। भो णिग्गिहीदोसि (४)।

भाण्डा। कथमिव?

---

(१) ॐ वसिष्ठः।

(२) मया पुनर्ज्ञातं व्याघ्रोवा, वृकोवा, एष इति।

(३) तेन परापतितेनैव सा वराकिका वत्सतरी भक्षितेति।

(४) भो निगृहीतोऽसि।

Digitized by Google

सौधा। जेण आअदेसु वसिट्ठमिस्सेसु वत्सदरी विस विदा; अज्जस्सेव पच्चागदस्स राएसिणो जणअस्स, भअवदा वम्मीएणवि दहिमउहिंस्सेव णिम्मन्दिदो मदुवक्को, वत्सदरी उण विसज्जिदा (१)।

भाण्डा। अनिवृत्तमांसानामेवं कल्पद्वयो मन्यन्ते; निवृत्तमांसस्तु तत्रभवान् जनकः।

सौधा। किं णिमित्तं?

भाण्डा। स तदैव देव्याः सीतायास्त्याद्दशं दैवदुर्व्विपाकमुपश्रुत्य वैखानसः संवृत्तः, तथास्य कतिपये संवत्सरा अस्मिन्द्वीपे तपोवने तप्यमानस्य।

सौधा। तदो किंति आअदो? (२)

भाण्डा। चिरन्तनप्रियसुहृदं प्राचेतसं द्रष्टुं।

सौधा। अवि अज्ज सम्बन्धिणीहिं समं संवुत्तं से दंसणं ण वेत्ति (३)।

भाण्डा। सम्प्रत्येव भगवता वशिष्ठेन देव्याः कौशल्यायाः सकाशं भगवत्यरुन्धती प्रहिता, यत् स्वयमुपेत्य वैदेहो द्रष्टव्य, इति वक्तुं।

---

(१) येनागतेषु वशिष्ठमिश्रेषु वत्सतरी विसृष्टा; अद्यैवागतस्य राजर्षेर्जनकस्य भगवता वाल्मीकिनापि दधिमधुभिरेव निर्वर्त्तितो मधुपर्कः, वत्सतरी पुनर्विसर्जिता।

(२) ततः किमित्यागतः?

(३) अद्यस्य सम्बन्धिनीभिः समं संवृत्तमस्य दर्शनं नवेति।

Digitized by Google

सौधा। जधा एदे सव्वे त्तविरा परप्परमिलिदा, तधा अम्हेवि वटुकेहिं समं मिलिअ, अणज्झायमहूसवं खेलन्ता संभावेम्ह (१)।

॥ इति परिक्रामतः ॥

भाण्डा। तदयं ब्रह्मवादी पुराणराजर्षिर्जनकः प्राचेतस वशिष्ठावुपास्य, सस्त्रीत्याश्रमवहिर्दृष्टसमूलमधितिष्ठति। यएषः।

हृदि नित्यानुषक्तेन सीताशोकेन तप्यते,
अन्तःप्रसुप्तदहनो ज्वलन्निव वनस्पतिः।

॥ इति निष्क्रान्तौ। विष्कम्भकः ॥

॥ ततः प्रविशति जनकः॥

अपत्ये यत्ताद्दग्दुरितमभवत्तेन महता
विषक्तस्तीव्रेण व्रणितहृदयेन व्यथयता,
पटुर्धारावाही नवदव, चिरेणापि हि न मे
निलुन्तन्मर्माणि क्रकचदव मन्युर्विरमति।

कष्टमेवं नाम जरसा, दुःखेन च दुरासदेन, भूयः पराकस्मात्पतनप्रभृतिभिस्तपोभिराक्तरसधातुरनुपयुज्यमानो, नाद्यापि

---

(१) यथा एते सर्व्वे स्थविराः परस्परं मिलिताः, तथा आवामपि वटुभिः समं मिलित्वा, अनध्यायमहोत्सवं खेलन्तौ संभावयावः।

मे दग्धदेहः शेषति। अन्यतोनिमग्ना खलूर्व्या नाम, ते लोका लोभ्याः प्रतिविशीर्यन्ते, यत्रात्मजातिमदद्वेषवह्नयो मन्यन्ते। अनेकसम्वत्सरातिक्रमेऽपि च प्रतिक्षणपरिभावबाष्पदुर्निभाषः प्रत्ययदुर्व दारुणो न मे दुःखसंवेगः प्रशाम्यति। अपि नाम दैवजनसम्भवे देवि सीते, दुर्दृष्टसे निर्भाग्यभागः परिजनो, येन लज्जया स्वच्छन्दमात्मन्यितुमपि न शक्यते। हा हा पुत्रि; अनिशतरुदितक्षितं विराजत्कतिपयकोमलदन्तक्षुण्णलाजं, वदनकमलकं शिशोः स्मरामि, स्खलदमञ्जसमुग्धजल्पितं ते।

भगवति वसुन्धरे, यत्त्वमनिहडाधि।

त्वं वज्रिर्मुनयो वशिष्ठगृहिणी गङ्गा हि यस्याविदु
र्मोहात्मं, यदि वा रघोः कुलमुरुर्देवः स्वयं भास्करः;
विद्यां वामिव मामसूत भवती, तद्वत्तु या दैवतं,
तस्याः सं दुहितुस्तथा विधिवशं, किं दारुणैरुच्यथाः।

॥ नेपथ्येऽतरतो भगवतीमहादेव्यौ ॥

अरुन्धतीः। गृहिणीपदिश्यमानमार्गा भगवत्यरुन्धती ॥ उत्थाय ॥ इमां पुनर्भगवतीमहादेवीमाह ॥ विरूप्य ॥ हा, कथं महाराजदशरथस्य धर्मपत्नी, प्रियसखी मे कौशल्या; कथं प्रत्येति, दैवेयमिति।

आसीदियं दशरथस्य पृथिव्यपि श्रीः,
श्रीरेव वा किमुपमानपदेन सेया;
कष्टं वतान्यदिव दैववशेन जाता,
दुःखात्मकं किमपि भूतमहो विपाकः।

अयमपरः प्रायो दृग्विपर्यासः।

एतेव मे जनः पूर्वमासीन्मूर्ती महोत्सवः,
एते चारभिवासक्षं, जातं तत्रैव दर्शनं।

॥ ततः प्रविश्यान्तरन्तरी कौशल्या कञ्चुकी च ॥

अङ्ग। ननु ब्रवीमि प्रत्यक्षः, स्वयमुपेत्य वैदेहदर्शनेन वः सुखं गुरोरादेशः; अतएवाहं प्रेषिता; ततः कीऽयं पदे पदे महानध्यवसायः।

कञ्चु। देवि, संरम्भयात्मानं, अनुरुध्यस्व भगवतो वसिष्ठस्यादेशमिति विज्ञापयामि।

कौश। हद्दिसे काले सिथिलाधिदेवो दट्ठव्वोत्ति, सव्वं एव सव्वादं दुःखादं समुद्भवन्ति, ण सक्कुणोमि उव्वत्तमाणमूलं वम्मणं हिअअं अवत्थावदुं (१)।

---

(१) दृष्टव्ये काले मिथिलाधिदेवो द्रष्टव्योऽस्ति, सर्वमेव सर्वाणि दुःखानि समुद्भवन्ति, न शक्नोमि उद्वर्त्तमानमूलं वर्त्मनं हृदयमवस्थापयितुं।

Digitized by Google

भर०। अथ कः सन्देहः?

वज्रागवाहीन्यपि मानुषाणां दुःखानि, सहन्तुविद्योमजानि,
दृष्टे जने प्रेयसि दुःसहानि, शोकः सहस्रैरिव संप्लवन्ते।

कौश०। कधं वच्छाए वहूए एवं गदे, तस्स राएसिणो मुहं दंसइस्सं (१)।

भर०। एष वः स्नाय्यसमन्वी जनकानां कुलोदहः,
याज्ञवल्क्यो मुनिर्यस्मै ब्रह्मपारायणं जगौ।

कौश०। एसो सो महाराअस्स हिअआणंदो, वच्छाए वहूए पिदा राएसी; हद्धी, हद्धी, सब्भाविदम्हि अणुट्ठिदमहूसवे दिअहे; हा देव्व, सव्वंव्वेव तं जदि (२)।

जनकः॥ उपसृत्य॥ भगवत्यरुन्धति, वैदेहः सीरध्वजोऽभिवादयते।

---

(१) कथं वत्साया वध्वा एवं गते, तस्य राजर्षेर्मुखं दर्शयामः।

(२) एष स महाराजस्य हृदयानन्दो, वध्वाः पिता राजर्षिः; हा धिक्, हा धिक्, सम्भावितास्मि अनुष्ठितमहोत्सवे दिवसे, हा देव, सर्व्वमेव तन्नास्ति।

Digitized by Google

यथा पूतमन्यो निधिरपि पवित्रस्य महसः
पतिस्ते पूर्व्वेषामपि खलु गुरूणां गुरुतमः,
त्रिलोकीमङ्गल्यामवनितलखेलेन शिरसा
जगद्वन्द्यां देवीमुषसमिव, वन्दे, भगवतीं।

अरु। परं ज्योतिस्ते प्रकाशतां। अयं त्वां पुनातु देवः परोरजाय एष तपति।

जन। अयि दृष्टे, अपि कुशलमस्याः प्रजापालस्य मातुः।

वासु। निर्व्विशेषमतिनिष्ठुरमुपालभ्याः स्युः, राजर्षे, अनेनैव मन्युना; अचिरपरित्यक्तरामभद्रमुखचन्द्रदर्शनां, नार्हसि त्वं दुःखयितुमतिदुःखितां, देवीं। रामभद्रस्यापि दैवदुर्निर्योगः, कोऽपि, यत् किल समन्तात् प्रवृत्तवीभत्सकिंवदन्तीकाः पौरजानपदा नाग्निपरिशुद्धिमत्यकाः प्रतिपद्यन्ते, इत्यतो दारुणमनुष्ठितं।

जन। आः, कोऽयमग्निर्नामास्मत्प्रभुपरिभावने; कष्टमेवं वादिना जनेन; रामपरिभूताश्रपि वयं, पुनः परिभूयामहे।

अरु। एवमेतत्, अग्निरिति वत्सां प्रति परिजघन्यत्वं राज्ञि सीतेत्येव पर्य्याप्तं, हा वत्से;

अग्निर्भा, अग्निर्या वा, यदसि, मम, तत्तिष्ठतु, तथा
विप्रुड्डेरत्कर्षस्त्वयि तु भम भक्तिं जनयति।

Digitized by Google

अनिष्टानं, स्वैरं वा भवतु, मनु वन्द्यासि जगतो;
गुणाः पूजास्थानं गुणिषु, न च लिङ्गं, न च वयः।

कौशल्या। अम्बो उम्मीलन्ती वेअणाओ (१)।

॥ इति मूर्च्छति ॥

जनः। हा कष्टं, किमेतत्!

अरु। राजर्षे किमन्यत्?

स राजा, तत्सौख्यं, स च शिशुजनस्ते च दिवसाः,
सुतावाविर्भूतं त्वयि, सुहृदि, दृष्टे, तदखिलं।
विपाके घोरेऽस्मिन्नथ खलु विमूढा तव वयं;
पुरश्चीर्णा चैतः कुसुमसुकुमारं हि भवति।

जन। कष्टं, कष्टं, सर्व्वथा मृग्योऽसि, चिरस्य दृष्टान् प्रियसुहृदः प्रियदाराञ्च खिन्नं पश्यामि।

स सम्बन्धी, स्राघ्यः प्रियसुहृदसौ तच्च हृदयं;
स चानन्दः, साक्षादपि च विखिलं जीवितफलं;
शरीरं, जीवो वा, यदधिकमितो वा प्रियतरौ,
महाराजः श्रीमान्, किमिव मम नासीद्यदयः।

कष्टमियमेव या कौशल्या;

यदस्याः पत्युर्व्वा दहति परमं दूषितमभू
दभूवं दम्पत्योः पृथगहमुपालम्भविषयः;

---

(१) अम्बो उन्मीलन्ति वेदनाः।

Digitized by Google

प्रसादे, कोपे वा, तदनु मदधीनो विधिरभू
दहं वाल्यः सूनां हसति यदवस्कन्द्य हृदयं।

अर। हा कष्टमतिचिरनिरङ्कुशमार्यनिष्ठुरं हृदयमस्याः।

जन। हा जिवत्सि॥ इति कमण्डलूदकेन सिञ्चति॥

कञ्चु।

सुहृदिव प्रकटय्य सुखप्रदः प्रथमसेकरयानुकूलतां,
पुनरकाण्डविवर्त्तनदारुणः प्रविनिनष्टि विधिर्मनसो रुजं।

कौस॥ संज्झां सन्धा॥ हा वत्से आनकि, कुचासि; सुमरामि ते विवाहलच्छीपरिग्गहेक्कमङ्गलं अप्फुरन्तअणुबद्धहसिद मुद्धमुहपुण्डरीअं; आप्फुरन्तकोमुदीचन्दचन्दिआसुन्दरेहिं अङ्गेहिं; उल्लासेहि, आदे, पुणोवि उज्जोएहि उअङ्गं, जम्मधा महाराओ भणादि, एसा रघुउलमहन्तराणं वहू, अज्जाअं दु जणअसम्बन्धेण दुहिदिआएव (१)।

---

(१) हे वत्से आनकि, कुचासि; स्मरामि ते विवाहलक्ष्मी परिग्रहैकमङ्गलं प्रस्फुरदनुबद्धहसितमुग्धमुखपुण्डरीकं; आस्फुरत्कौमुदीचन्द्रचन्द्रिकासुन्दरैरङ्गैरुल्लासय, जाते, पुनरप्युद्योतयोद्योतं, यथा महाराजो भणति एषा रघुकुलमहत्तराणां वधूरार्याकन्तु जनकसम्बन्धेन दुहितैव।

Digitized by Google

कञ्चु। यथाह देवी।

पश्चप्रसूतेरपि राघवाणां प्रियो विशेषेण सुवाऽभवत्,
वधूचतुष्केऽपि यथैव भ्राता प्रिया तनूजास्व. तथैव सीता।

जन। हा प्रियसख महाराज दशरथ, एवमपि सर्व्वप्रकारकहृदयक्रूरः, कथं विलप्स्यसे!

कन्यायाः किल पूजयन्ति पितरो जामातुरात्मं जनं,
सम्बन्धे विपरीतमेव तदभूदाराधनं ते मयि,
तं कालेन तथाविधोऽप्यपहृतः, सम्बन्धबीजन्तु तद्
घोरेऽस्मिन्मम जीवलोकनरके पापस्य; धिग्जीवितं!

कौश। अज्जे आसह, किं करेमि; दिढवज्जलेवघडिअबन्धविअलंमेव हदजीविदं; तधा एत्थ मं मन्दभाइणिं ण परिच्चअहि(१)।

अरु। आर्य्यविद्धि, राजपुत्रि, वाग्यविभ्राभोऽप्यन्तराले कर्त्तव्यएव अन्यच्च, किं न स्मरसि, यदवोचत् च्यवनमहर्षेराश्रमे युष्माकं कुलगुरुस्त्वयेत्युपजातमेवकिन्तु कल्याणोदर्कं भविष्यति।

---

(१) आर्ते, आर्यकि, किं करोमि, दृढ वज्रलेपघटितं बन्धविश्लेषमेव हतजीवितं; तथात्मच मां मन्दभाग्यां न परित्यजति।

कौश। भगवदि, अदिक्कन्तो मनोरधो (१)।

अरु। तत्किं मन्यषे, राजपुचि, मृषेदं तदिति, नहीदं सुचचियेऽन्यथा मन्तव्यं, भवितव्यमेव तेन।

आविर्भूतज्योतिषां ब्राह्मणानां ये व्याहारास्तेषुमा संशयोऽभूत्, भद्रा श्लेषां वाचि लक्ष्मीर्नियुक्ता, नैते वाचं विप्लुतां व्याहरन्ति।

॥ नेपथ्ये। कलकलः सर्वे आकर्षयन्ति ॥

जनकः। अद्य खलु मिष्टानध्यायइति खेलतां वटूनां कलकलः।

कौश। सुलहसोक्खं दाणिं वालत्तणं भोदि॥ निरूप्य॥ अम्महे, एदाणं मज्झे, को एसो रामभद्दलच्छीसरिसेहिं सावट्ठंभमुद्धखलिदेहिं, अङ्गेहिं अम्हाणंपि लोअणाइं सीअला वेदि (२)?

अरु॥ अपवार्य्य सहर्षवाष्पं॥ इदं नाम तद्भागीरथी निवेदितरहस्यं कर्णामृतं; नत्वेवं विद्मः कतमोऽयमायुष्मतोः कुशलवयोरिति।

---

(१) भगवति, अतिक्रान्तो मनोरथः।

(२) सुलभसौख्यमिदानीं बालत्वं भवति। एतेषां मध्ये, कएष रामभद्रलक्ष्मीसदृशैः सावष्टम्भमुग्धस्खलितैरङ्गैरस्माकमपि लोचनानि प्रीतलयति।

Digitized by Google

जन। कुवलयदलश्यामस्निग्धः स्निग्धकमण्डनो,
वटुपरिषदं पुण्यश्रीकः, श्रियैव समाजयन्;
पुनरिव स्निग्धुर्भूला वत्सः, स मे रघुनन्दनो
घटिति कुरुते दृष्टः, कोऽयं दृशोरमृताञ्जनं?

कञ्च। नूनं चिरयज्ञब्रह्मचारी दारकोऽयमिति मन्ये। एवमेव। तथाहि।

चूडाचुम्बितकङ्कपक्षमभितस्कुण्डीद्वयं पृष्ठतो,
भस्मश्लोकपवित्रताञ्छनमुरो धत्ते त्वचं रौरवीं,
मौर्व्या मेखलया नियन्त्रितमधो वासश्च माञ्जिष्ठकं,
पाणौ कार्ष्मुकमक्षसूत्रवलयं, दण्डोऽपरः पैप्पलः।

भगवत्यरुन्धति, किमुत्प्रेक्षसे, कुतस्थोऽयमिति?

अरु। अद्यैव वयमप्यागताः।

जन। आर्य्ये दृष्टे, अतीव मे कौतुकं वर्त्तते। तद्भगवन्तं वाल्मीकिमेव गत्वा, पृच्छः इमञ्च वालकं ब्रूहि, केऽयेते प्रवयसस्त्वां दिदृक्षवइति।

कञ्चु। यदाज्ञापयसीति॥ निष्क्रान्तः॥

कौश। किं भणथ; एवं भणिदो आगमिस्सदीत्ति (१)?

---

(१) किं भणत; एवं भणित आगमिष्यतीति?

Digitized by Google

अरु। भिद्येत वायद्दृत्तमीदृशस्य निर्माणस्य।

कौश॥ विचिन्त्य॥ कधं सविणअं णिआमिदगिट्ठिवअणो, विस ज्जिदरिसिदारओ, एतोहिमुहं पसरिदोज्जेव सो वच्छो (१)।

जन॥ चिरं निर्व्वर्ण्य॥ भोः किमप्येतत्।

महिम्नामेतस्मिन् विनयगुरुतामौग्धमसृणो
विदग्धैर्निर्याह्नो, न पुनरविदग्धैरतिगमः;
मनो मे संमोहः स्थिरमपि हरत्येव बलवा
नयोधातुं यद्वत् परिलघुरयस्कान्तशकलः।

॥ प्रविश्य॥ लवः॥ स्वगतं॥ अज्ञातनामक्रमाभिजनान् पूज्या नपि नः स्वतः कथमभिवादयिष्ये॥ विचिन्त्य॥ अयं पुनरविरुद्धः प्रकारइति वृद्धेभ्यः श्रूयते॥ सविनयमुपसृत्य॥ एष वो लवस्य शिरसा प्रणामपर्य्यायः।

अरुन्धतीजनको। कल्याणिन्यायुष्मान् भूयाः।

कौश। तात, चिरं मे जीव (२)।

अरु। एहि वत्स॥ लवं उत्संगे कृत्वा, अंपवार्य्य॥ दिष्ट्या न केवलमुत्सङ्गश्चिरान्मनोरथो मे सम्पूर्णः।

---

(१) कथं सविनयं निर्यामितदृष्टिवचनो विसर्जितऋषि दारक, इतोऽभिमुखं प्रसृतएव स वत्सः।

(२) तात, चिरं मे जीव।

Digitized by Google

कौश। जाद इदोवि दाव एहि ॥ उत्तङ्के बला ॥ अम्महे, ण केवलं दरविकसन्ननीलुप्पलसामलुज्जलेण देहबन्धेण कवलिदारविन्दकेसरकसाअकण्ठकलहंसणिग्घोसघग्घरणिणा ददीहरदीहरेण सरेण रामभद्दमणुहरदि; णं कठिणकमलगब्भपच्चलो सरीरफंसोवि तादिसोच्चेव वत्सस्स। जाद, पेक्खामि दाव दे मुहं॥ चिबुकमुन्नमय्य निरूप्य च सवाष्पाकूतं॥ राएसि, किं ण पेक्खसि, णिउणं णिरूविज्जन्ते, वच्छाए वङ्कए मुहअंदेण संवदहिज्जेव (१)।

जन। पश्यामि, सखि, पश्यामि।

कौश। अम्मे उम्मत्तीभूदंविअ मे हिअअं किंपि एतो मुहं विप्पलवदि (२)।

---

(१) जात इतोऽपि तावदेहि। विस्मये, न केवलं दरविकसन्नीलोत्पलश्यामलोज्ज्वलेन देहबन्धेन कवलितारविन्दकेसरकषायकण्ठकलहंसनिर्घोषघर्घरनिनाददीर्घदीर्घेण स्वरेण, रामभद्रमनुहरति, ननु कठिनकमलगर्भपक्ष्मलः शरीरस्पर्शोऽपि तादृशएव वत्सस्य। जात प्रेक्षे तावत्ते मुखं। राजर्षे, किं न प्रेक्षसे निपुणं निरूप्यमाणो वत्साया बध्वा मुखचन्द्रेण संवदत्येव।

(२) अम्बो उन्मत्तीभूतमिव मे हृदयं किञ्चिदपि इतो मुखं विप्रलपति।

Digitized by Google

जन॥ निरूप्य॥

वत्सायाश्च रघूद्वहस्य च मिथावस्मिन्नभिव्यज्यते,
संपूर्णप्रतिविम्बितेव निखिला सैवाकृतिः, सा द्युतिः;
सा वाणी, विनयः सएव, सहजः पुण्यानुभावोऽप्यसौ;
हा, हा, दैव, किमुत्पथैर्मम मनः पारिप्लवं धावति।

कौश। अत्थि दे मादा, सुमरसि वा तादं?(१)

लवः। नहि, नहि।

कौश। तदो कस्स तुमं(२)।

लवः। भगवतो वाल्मीकेः।

कौश। अयि, जाद, कधिदव्वं कधेहि(३)।

लवः। एतदेव जानामि।

॥नेपथ्ये॥ भोभोः सैनिकाः, एष खलु कुमारश्चन्द्रकेतुराश्रमं पवति; न केनचिदाश्रमाभ्यर्णभूमिराक्रमितव्येति।

अरुन्धतीजनकौ। अद्य, मेध्याश्वरक्षाप्रसङ्गादुपागतो वत्सश्चन्द्रकेतुरद्य द्रष्टव्यः; इत्यहो सुदिवसः,

कौश। वच्छ लक्खणस्स पुत्तको आणवेदित्ति, अमिअविन्दुसुन्दराइं अक्खराइं सुणीअन्ति(४)।

---

(१) अस्ति ते माता, स्मरसि वा तातं?

(२) ततः कस्य त्वं?

(३) जात, कथितव्यं कथय।

(४) वत्सलक्ष्मणस्य पुत्र आज्ञापयतीति, अमृतविन्दुसुन्दराण्यक्षराणि श्रूयन्ते।

Digitized by Google

लवः। आर्य्य कएष चन्द्रकेतुर्नाम?

जन। जानासि रामलक्ष्मणौ दाशरथी?

लवः। एतावेव रामायणकथापुरुषौ।

जन। अथकिं।

लवः। तं, कथं न जानामि?

जन। तस्य लक्ष्मणस्यायमात्मजश्चन्द्रकेतुः।

लवः। ऊर्म्मिलापुत्रस्तर्हि मैथिलस्य राजर्षेर्दौहित्रः।

अरु॥ विहस्य॥ आविष्कृतं कथाप्रावीण्यं वत्सेन।

जन॥ विचिन्त्य॥ यदि त्वमीदृशः कथायामभिज्ञस्तद्ब्रूहि तावत्पृच्छामस्तेषां दाशरथात्मजानां किंनामधेयान्यपत्यानि, केषु दारेषु प्रसूतानि?

लवः। नायं कथाप्रविभागोऽस्माभिरन्येन वा श्रुतपूर्व्वः

जन। किं न प्रणीतएवं कविना।

लवः। प्रणीतो, न तु प्रकाशितः; तस्यैव खलु कोऽप्येकदेशः सन्दर्भान्तरेण रसवानभिनेयार्थः श्रुतस्तच्च स्वहस्तलिखितं, मुनिर्भगवान् व्यासजङ्घरतस्य मुनेस्तौर्य्यत्रिकसूचकारस्य।

जन। किमर्थं?

लवः। स किल भगवान् भरतस्तमपरोभिः प्रयोजयिष्यतीति।

जन। तत्सर्व्वमस्माकमिदमाकूतकरं।

लवः। महतो पुनस्तस्मिन् भगवतो वाल्मीकेराज्ञा;

Digitized by Google

तदमीषामन्तेवासिनां हस्तेन तत्पुत्रकं भरतात्रमं प्रेषितं। तेषा मनुयाचिकस्यापवाहिरप्रमादार्थमस्माभिरता प्रेषितः।

कौश। जात, भादावि दे अत्थि (१)?

लवः। अस्त्यार्य्यः कुशोनाम।

कौश। ज्येट्ठोत्ति भणिदं भोदि (२)?

लवः। एवमेतत् प्रसवक्रमेण स किल ज्यायानिति।

जन। किं यमजावावुत्पन्नौ?

लवः। अथकिं।

जनः। कथय, कथाप्रबन्धस्य कीदृशः पर्य्यन्तः।

लवः। अलीकपौरप्रवादोद्विग्नेन राज्ञा निर्वासितां, देवय जनसम्भवां सीतादेवीमासन्नप्रसववेदनामेकाकिनीमरण्ये परि त्यज्य, लक्ष्मणः प्रतिनिवृत्तइति।

कौश। हा वच्छे, मुद्धचन्दमुहि, को दाणिं दे कुसुमभूदस्स सरीरस्स देव्वदुव्विलासपरिणामो एक्कल्लिआए विवत्तिदो (३)।

जन। हा वत्से!

नूनं त्वया परिभवस्य नवस्य घोरं;

तास्य व्यथां प्रसवकालकृतामवाप्य,

---

(१) जात भ्रातापि ते अस्ति?

(२) ज्येष्ठ इति भणितं भवति?

(३) हा वत्से, मुग्धचन्द्रमुखि, कस्तदानीं ते कुसुमभूतस्य शरीरस्य दैवदुर्विलासपरिणामएकाकिन्यानिपतितः।

Digitized by Google

कथाङ्गेषु परितः परिवारयन्तु,
यन्नस्तया शरणमित्यवदत् सुतोऽसि ।

लवः । आर्ये कावेतौ ?

अर० । दूरं कौतूहलाक्रान्तौ, अयं जनकः ।

लवः ॥ सवज्रमानखेदकौतुकं पश्यति ॥

जन० । अहो दुर्मर्यादता दुरात्मनां पौराणां ! अहो रामस्य राज्ञः चिप्रकारिता !

एतद्दैन्यघनोरुवज्रपतनं प्रत्यक्षमीत्यक्षतः,
क्रोधस्खलितुं धृतिर्यदवशस्यापेन, शापेन वा ।

कौश० । भगवति, परित्रायस्व, परित्रायस्व; प्रसादेहि दृहिभं राजर्षिं (१) ।

अर० । एतद्धि परिभूतानां प्रायश्चित्तं मनस्विनां,
राजन्नपत्यं रामस्ते पाल्यास्च कृपणाः प्रजाः ।

जन० । शान्तं वा रघुनन्दने, तदुभयं तत्पुत्रभाण्डे हि मे,
भूयिष्ठद्विजबालवृद्धविकलस्त्रैणस्य पौरो जनः ।

॥ प्रविश्य संभ्रान्ता वटवः ॥ कुमार, अश्वोऽश्व इति; पशुसमाम्नायिकः कोऽपि भूतविशेषो जनपदेषु श्रूयते, सोऽयमस्माभिरधुना स्वयं प्रत्यक्षीकृतः ।

लवः । अश्वोऽश्वइति, तच्च पशुसमाम्नाये, संग्रामिके च, पठ्यते; तद्भूत कीदृशः ?

---

(१) भगवति, परित्रायस्व, परित्रायस्व; प्रसादय राजर्षिं ।

वटवः। भूयतां;

पश्चात्पुच्छं वहति विपुलं, तच्च धूमोद्गजलं,
दीर्घीवः स भवति खुराश्चास्य चत्वार एव।
शब्दायन्ते, मुहुरिति, मुहुस्तिष्ठकाग्रासमाचान्,
किं व्याख्यातैर्व्रजति स पुनर्दूरमेवेहि, यामः।

॥ इत्युपसृत्याजिरे हस्तयोरुत्क्षिप्य नृत्यन्ति ॥

स्वः॥ यकौतुकोपरोधविघ्नं ॥ आर्याः, पश्यत पश्यत, इभिर्नीतोऽस्मीति॥ मरितं परित्रायध्वं ॥

अरुन्तुदजनकौ। पूरयतु कुतूहलं वत्सः।

कौश। भवदि, आणामि, एदं अणाहो अन्तीअणीआमि, विअ; अतो अवहो भविअ, पेक्खन्तु दाव गच्छमाणं दीहाउं (१)।

अरु। अतिजवेन दूरमतिक्रान्तः स चपलः कथं दृश्यते?

॥ प्रविश्य ॥ कञ्चुकी। भगवान् वाल्मीकिराह, ज्ञातव्यमेतद् वत्सरे भवद्भिरिति।

जन। अतिगम्भीरमेतत् किमपि भविष्यति। भगवत्यरुन्धति, सखि कौशल्ये, आर्य्यं गृहीत्वे, स्वयमेव गत्वा, भगवन्तं प्राचेतसं पश्यामहति॥ निष्क्रान्तो वृद्धवर्गः॥

वटवः। पश्यतु हि कुमारस्तदार्य्यं।

---

(१) भगवति, आज्ञापयामि, एतमपश्यन्ती न जीवामीव; तर्हि तोऽन्यतो भूत्वा, प्रेक्षामहे, तावदुच्छ्वसन्तं दीर्घायुषं।

लवः । दृष्टमवगतञ्च, नूनमाश्वमेधिकोऽयमश्वइति ।

वटवः । कथं ज्ञायते?

लवः । ननु मूर्खाः, पठितमेव युष्माभिस्तत्काण्डे, किं न पश्यत? प्रत्येकं शतसंख्याः कवचिनो, दक्षिणो, निषङ्गिणश्च, रक्षितारश्चात्मायमेवेदमपि हन्यते। यद्दीह न प्रत्ययस्तद्गत्वा पृच्छत।

वटवः । भो भोः, किं प्रयोजनोऽयमश्वः परित्रतः पर्य्यटति?

लवः ॥ सत्यृहमात्मगतं ॥ अये, अश्वमेधइति विश्वविजयिनां क्षत्रियाणामूर्जस्वलः सर्व्वक्षत्रियपरिभावी महानुत्कर्षनिष्कर्षः ।

॥ नेपथ्ये ॥ अयमश्वः, पताकेयमथवा, वीरघोषणा,
सप्तलोकैकवीरस्य दम्भकण्डकुलद्विषः ।

लवः ॥ सव्यथमिव ॥ अहो, सन्दीपनान्यक्षराणि ।

वटवः । प्राज्ञः खलु कुमारः, किमुच्यते?

लवः । भो भोस्तत्किमक्षत्रिया पृथ्वी, यदेवमद्भुतमुच्यते?

॥ नेपथ्ये ॥ अरे, महाराजस्मृति कुतः क्षत्रियाः?

लवः । धिग्जाल्मान् ।

यदि ते सन्ति सन्त्येव, केयमन्या विभीषिका,
किमुक्तैः, शरसम्बाधां पताकां तां हरामि वः ।

भो भो वटवः, परित्रत्य लोष्टैरपघ्नन्तो, नयतैनमश्वं, एष

Digitized by Google

रोहितानां मध्ये वराकश्चरतु।

॥ प्रविश्य सक्रोधदर्पः पुरुषः॥ धिक् चापलं; किमुक्त्वा नसि? तीक्ष्णनीरसा ह्यायुधीयश्रेण्यः; शिशोरपि न दृप्तां वाचं मनुसहन्ते; राजपुत्रश्चन्द्रकेतुरालक्ष्यशरासनः, सौम्यपूर्व्वारण्यदर्शनकौतूहलाक्षिप्तहृदयो, न परापतत्यद्यापि, तच्चरितमपसर्पतानेन तरुगहनेन।

वटवः। कुमार, श्रुतमनेनार्येण; तर्ज्जयन्ति विस्फुरितग्रस्ताः कुमारमायुधीयश्रेण्यः; दूरे चाश्रमपदमितस्तदेहि हरिणप्लुतैः पलायामहे।

सर्वे। किं नाम विस्फुरन्ति ग्रस्तानि॥ धनुरारोपयन्॥

ज्याजिक्वया वलयितोत्कटकोटिदण्ड-
मुद्गारिघोरघनघर्घरघोषमेतत्,
ग्रासप्रसक्तहरदन्तकवक्त्रयन्त्र-
जृम्भाविडम्बिविकटोदरमस्तु चापं।

॥ इति यथोचितं परिक्रम्य निष्क्रान्ताः सर्व्वे॥ कौशल्याजनकोनाम चतुर्थोऽङ्कः॥

Digitized by Google

॥ अथ पञ्चमोऽङ्कः ॥

॥ नेपथ्ये ॥ भो भोः सैनिकाः, आतं आतमवलम्बमानमस्मार्क्षं नम्बेष त्वरितसुमन्त्रनुद्यमानव्यावल्गत्प्रजवनवाजिना रथेन, उद्दामप्रचलितकोविदारकेतुः अुत्पातः प्रधनमुपैति चन्द्रकेतुः।

॥ ततः प्रविशति, सुमन्त्रसारथिना रथेन, धनुःपाणिः, बाहुतहर्षसंभ्रमश्चन्द्रकेतुः ॥ आर्य्य सुमन्त्र पश्य।

किरति कलितकिञ्जल्कोपरञ्जन्मुखश्री
रविरतगुणमुक्तकोटिना कार्मुकेण,
समरशिरसि यस्य चन्द्रचूडस्य सूनो
मुपरि शरतुषारं कोऽप्ययं वीरपोतः? ॰पोतः

आश्चर्यमाश्चर्यं।

मुनिजनमिश्रुरेकः, सर्व्वतः सैन्यकार्ये,
नवदव रघुवंशख्याप्रसिद्धः, प्रगेहः;
दलितकरिकपोलग्रन्थिटङ्कारघोरं,
ज्वलितशरसहस्रैः, कौतुकं मे करोति।

सुमन्त्रः। आयुष्मन्।

अतिशयितसुरासुरप्रभावं भृगुमवलोक्य, तवैव तुल्यरूपं,
कुशिकसुतमखद्विषां प्रमाथे धृतधनुषं रघुनन्दनं स्मरामि।

Digitized by Google

चन्द्र। दूरमस्मत्सैन्यमुद्दिश्य, भूयसामारब्धमिति, हृदयमपचपते।

अयं हि भिद्युरैकैक समररेणुभूरिस्फुर
त्कराल करकन्दलीकलितशस्त्रजालैर्व्वलैः;
क्वणत्कनककिङ्किणीझणझणायितस्यन्दनै
रमन्दमदुर्दिनद्विरदवारिदैरावृतः।

सुमं। वत्स, एभिः समस्तैरपि किमस्य किं पुनर्व्यस्तैः?

चन्द्र। आर्य्य, लक्ष्यतामनेन हि महानाश्रितजनप्रमाथोऽस्माकमारब्धः। तथाहि;

आगुञ्जद्गिरिकुञ्जकुञ्जरघटाविस्तीर्णकर्णज्वरं,
ज्यानिर्घोषसमन्ददुन्दुभिरवैराक्षातमुज्झत्यथन्,
वेल्लद्भैरवभूरिरङ्गनिकरैर्वीरो विधत्ते, भुव
स्तृण्यत्कालकरालवक्त्रविघसव्याकीर्य्यमाणाइव।

सुमं॥ स्वगतं॥ कथमीदृशेन सह वत्सचन्द्रकेतोर्दन्द्वसंप्रहारमनुजानीयां?॥ विचिन्त्य॥ अथवा, दत्ताकृतहृद्वृद्धाः खलु वयं; प्रत्युपस्थिते च का गतिः?

चन्द्र॥ सविस्मयलज्जासंभ्रमं॥ धिक् प्रतिनिवृत्तानि सर्व्वतः सैन्यानि मम।

सुमं॥ रथवेगमभिनीय॥ आयुष्मन्, एष वाम्विष यीक्षतस्ते प्रवीरः।

चन्द्र॥ विस्मृतिमभिनीय॥ आर्य्य, किन्नामधेयमाख्यात माङ्गायकैः।

Digitized by Google

सुमं। वत्स, लव इति।

चन्द्र। भोभो लव, महावाहो किमेभिर्लव, वैणिकैः,

एषोऽहमेहि मामेव, तेजस्वीजसि ग्राम्यतु।

सुमं। कुमार, पश्यंपश्य।

व्यपवर्त्तत एष वासवीरः पृतनानिर्मथनात्क्षयोपहृतः,

क्षणविह्वलरवादिभावखीनामवमर्दादिव दृप्तसिंहभावः।

॥ ततः प्रविशति त्वरितोद्भ्रान्तपराक्रमो लवः॥

लवः। साधु राजपत्र, साधु; सत्यमैक्ष्वाकः खल्वसि, तदयं परागतएवास्मि।

॥ नेपथ्ये ॥ महान् कलकलः।

लवः॥ सावेगं परावृत्य॥ कथमिदानीं भग्नाश्वपि प्रतिनिवृत्य युद्धाभिषारिणः पर्य्यवस्थन्ति, माद्यमूपतयः? धिग्जाल्मान्।

अयं श्रेणीघातक्षुभितवडवावक्त्रज्वलनभुक्,

प्रचण्डक्रोधार्चिर्निचयकवलं व्रजतु मे;

समन्तादुत्सर्पन् घनतुमुलहेलाकलकलः,

पयोराशेरोघः प्रलयपवनस्खलितइव।

॥ सखेदं परिक्रामति॥

चन्द्र। भोभोः कुमार,

अत्यद्भुतादपि गुणातिशयात् प्रियोऽसि,

तस्मात् सखा त्वमसि यन्मम तत्त्वमेव;

Digitized by Google

तत्किं निजे परिजने कदनं करोषि?

नन्वेष दर्पनिकषस्तव चन्द्रकेतुः।

लवः॥ सहर्षसंभ्रमं परावृत्य॥ अहो, महानुभावस्य प्रसन्न खरकर्कशा वीरवचनयुक्तिर्वैकर्तनकुलकुमारस्य! तत्किमेभिरे नमेव तावत् सम्भावयामि॥ पुनर्नेपथ्ये कलकलः॥

लवः॥ सक्रोधनिर्वेदं॥ आः, कदर्थितोऽहमेभिर्वारंवारं विघ्न कारिभिर्घोषैः॥ तदभिमुखं परिक्रामति॥

चन्द्र। आर्य्य, आर्य्य, इदमेतदुद्दृष्टं।

दर्पेण कौतुकवतामपि बद्धलक्ष्यः

पश्चाद्खैरनुसृतोऽयमुदीर्णधन्वा

देधा समुद्धतमरुत्तरलस्य, धत्ते,

मेघस्य माघवतचापधरस्य लक्ष्मीं।

सुमं। कुमार एवैनं द्रष्टुमपि जानाति, केवलन्तु परवन्तो वयं विस्मयेन।

चन्द्र। भोभो राजानः,

सङ्घातोत्तैर्दिरदतुरगस्यन्दनस्थैः पदातां

वर्चैकस्मिन्, कवचनिचितैर्मेघचर्मोत्तरीये,

कालज्येष्ठैरचरमवयः काम्यकाये, भवद्भि

र्योऽयं बद्धो युधि परिकरस्तेन वो धिग्धिगस्मान्।

लवः॥ सोन्माथं॥ कथमनुकम्पते नाम?॥ विचिन्त्य॥ भवतु,

Digitized by Google

कालहरणप्रतिषेधाय जृम्भकास्त्रेण तावत् सैन्यानि संस्तभ्नामि ॥ इति ध्यानं नाटयति ॥

सुमं। तत्किमकस्मादस्माकं वले सैन्यघोषाः प्रशाम्यन्ति।

लवः। पश्यामोऽनमधुना सप्रगल्भं।

सुमं ॥ सवल्गुमं ॥ वत्स, मन्ये कुमारकेणानेन जृम्भकास्त्रमामन्त्रितं।

चन्द्र। अथ कः सन्देहः?

व्यतिकरदव भीमसामसो वैद्युतस्य,
प्रणिहितमपि चक्षुर्ग्रासमुग्रं हिनस्ति।
अथ लिखितमिवैतत् सैन्यमस्मद्भटानां
नियतमभिनवीर्य्यं जृम्भते जृम्भकास्त्रं।

आश्चर्य्यं आश्चर्य्यं!

पातालोदरकुञ्जपुञ्जिततमःश्यामैर्नभो जृम्भकै
रुत्तप्तस्फुरदारकूटकपिलज्योतिर्ज्वलद्दीप्तिभिः;
कल्पाक्षेपकठोरभैरवमरुद्व्यस्तैरवाकीर्य्यते,
भीमोन्मेघतडित्कडारकुहरैर्विन्ध्याद्रिकूटैरिव।

सुमं। कुतः पुनरस्य जृम्भकाणामागमः स्यात्?

चन्द्र। भगवतः प्राचेतसादिति मन्यामहे।

सुमं। नैष व्यवहारोऽस्त्रेषु, विशेषतो जृम्भकेषु।
यतः।

क्षणात्यतनयास्त्रेते क्षणात्त्वात्कौशिकसुताः;
अथ तत्संप्रदायेन रामभद्रे स्थिता इति।

Digitized by Google

चन्द्र। अपरेऽपि परमोपचीयमानसत्वप्रकाशाः स्वयं हि मन्त्र दृशः पश्यन्ति।

सुमं॥ साधु॥ वत्स, सावधानो भव, परागतः प्रवीरः।

॥ कुमारावन्योन्यं प्रति॥ अहो प्रियदर्शनः कुमारः॥ यस्नेहानुरागं निर्वर्ण्य॥

यदृच्छासंवादः किमु, किमु गुणानामतिशयः,
पुराणो वा जन्मान्तरनिबिडबन्धः, परिचयः,
निजो वा सम्बन्धः, किमु विधिवशात् कोऽप्यविदितो,
ममैतस्मिन् दृष्टे हृदयमवधानं रचयति।

सुमं। भूयसा जीविधर्मणैष, यदनवमधौ कस्यचित् क्वचित् प्रीतिः, यच्च लौकिकानामुपचारस्तारामैचकं वा चक्षूराग इति, तमप्रतिसंख्येयमनिबन्धनं प्रेमाणमामनन्ति।

अहेतुः पक्षपातो यस्तस्य नास्ति प्रतिक्रिया,
स हि स्नेहात्मकस्तन्तुरन्तर्मर्माणि सीव्यति।

॥ कुमारावन्योन्यं प्रति॥

एतस्मिन् मसृणितराजपट्टकान्ते
मोक्तव्याः कथमिव सायकाः शरीरे?
यत्प्राप्तौ मम परिरम्भणाभिलाषा
दुन्मीलत्पुलककदम्बमङ्गमास्ते।
किन्त्वाक्रान्तकठोरतेजसि गतिः का नाम शस्त्रं विना?
शस्त्रेणापि हि तेन किन्न विषयो जायेत यस्नेहशः।

किं वक्ष्यत्ययमेवमद्य विमुखं मामुद्यतेऽप्यायुधे,
वीराणां समयो हि दारुणरसः स्नेहक्रमं बाधते।

सुमं॥ सर्वं निर्वर्ण्य सास्रमात्मगतं ॥ हदय, किमन्यथा परिकल्प्यसे?

मनोरथस्य यद्बीजं तद्दैवेनाहितो हतं,
लतायां पूर्व्वलूनायां प्रसूनस्यागमः कुतः

चन्द्र। अवतराम्यहमार्य्य सुमन्त्र स्यन्दनात्।

सुमं। तत्कस्य हेतोः?

चन्द्र। यतस्तावदयं वीरः पुरुषः पूजितो भवति॥ अपिच॥ स्वार्य्य चापधर्मः समनुगतो भवति, न रथिनः पादचार मायोधयन्तीति शस्त्रदेवताः परिभाषन्ते। शास्त्र०

सुमं। कष्टं वतानुप्रपन्नोऽस्मि।

कथं न्याय्यमनुष्ठानं मादृशः प्रतिषेधतु;
कथं वाप्यनुजानातु साहसैकरसां क्रियां।

चन्द्र। यदा तातमिश्राश्रपि पितुः प्रियं सखायं धर्म्मार्थसं श्रयेष्वार्य्यमेव पृच्छन्ति, तत्किमार्य्यो विसृजति?

सुमं। आयुष्मन्नेवं यथाधर्म्ममभिमन्यसे।

एष संग्रामिको न्याय, एष धर्म्मः सनातनः,
इयंहि रघुसिंहानां वीरचारित्रपद्धतिः।

चन्द्र। प्रतिरूपं वचनमार्य्यस्य।

Digitized by Google

इतिहासपुराणस्य धर्म्मप्रवचनान्यपि,
भवन्तएव जानन्ति, रघूणाञ्च कुलस्थितिं।

सुमं॥ सस्नेहाश्रुं परिष्वज्य॥

जातस्य ते पितुरपीन्द्रजितो निहन्तु
र्वत्सस्य वत्स कति नाम दिनान्यमूनि;
तस्याप्यपत्यमनुगच्छति वीरवृत्तं,
दिष्ट्या गतं दशरथस्य कुलप्रतिष्ठां।

चन्द्र॥ सकष्टं॥

अप्रतिष्ठे रघुज्येष्ठे, का प्रतिष्ठा कुलस्य नः,
इति दुःखेन तप्यन्ते चयो नः पितरोऽपरे।

सुमं। अहह, हृदयमर्म्मदारुणान्येतानि चन्द्रकेतोर्वचनानि।

लवः। हन्त मिश्रीकृतो रसक्रमो वर्त्तते।

यथेन्द्रावानन्दं व्रजति समुपोढे कुमुदिनी,
तथैवास्मिन् दृष्टिर्मम कलहकामः पुनरयं;
क्षणत्कारक्रूरक्षणितगुणगुञ्जद्धनुरधन
र्धृतप्रेमा वाऽऽविरकृतविकरालोल्बणरसः।

चन्द्र॥ अवतरणं रूपयन्॥ आर्य्य, साविचन्द्रकेतुरभिवाद्यते।

सुम। अजितं पुण्यमूर्जस्वि ककुत्स्थस्येव ते महः,
श्रेयसे भास्वता देवो वराहः परिकल्पतां।

Digitized by Google

॥ अपिच ॥

देवस्त्वां सविता विनोतु जगतो गोप्तस्त्वयैते पितः;
त्वां मैत्रावरुणोऽभिनन्दतु गुरुर्यस्ते गुरूणामपि;
ऐन्द्रं वैष्णवमाग्नि मारुतमथो सौपर्णमोजोऽस्तु ते;
देयादेव च रामलक्ष्मणधनुर्ज्याघोषमन्त्रो जयं।

लवः। कुमार, अति हि नाम शोभसे रथस्थएव, कृतं कृतमत्यादरेण।

चन्द्र। तर्हि महाभागोऽयं रथमलङ्करोतु।

लवः। आर्य्य, प्रत्यारोपय रथोपरि राजपुत्रं।

सुमं। त्वमप्यनुरुध्यस्व वत्सचन्द्रकेतोर्वचनं।

लवः। को विचारः खेषूपकरणेषु, किन्त्वरण्यसदो वयमनभ्यस्तरथचर्य्याः।

सुमं। जानामि, वत्स, दर्पसौजन्ययोर्यथाचरितं। यदि पुनरीदृशं त्वामैक्ष्वाको रामभद्रः पश्येत्तदास्य स्नेहेन हृदयमभिस्यन्देत्।

लवः। मन्ये, सुजनः स राजर्षिः श्रूयते॥ यतस्त्वमिव॥

वयमपि न खल्वेवंप्रायाः कृतघ्नपि मत्सराः,
कदह च गुणैस्तं राजानं न वा वज्र मन्यते।
तदपि खलु मे स व्याहारस्तुरङ्गमरक्षिणां
विहतिमखिलचाक्षेपप्रचण्डतयाऽकरोत्।

Digitized by Google

चक्र ॥ सस्मितं ॥ किन्नु भवतस्तातप्रतापोत्कर्षेऽप्यमर्षः।

लवः। अस्त्वमर्षो, मा भूदा, एतत्तु पृच्छामि; दान्तं हि राघवं राजानं शृणुमः, स किल नात्मना द्रक्ष्यति, नास्य प्रजा ईदृक्षो जायन्ते, तत्किं मनुष्यास्तस्य राक्षसीं वाचं वदन्ति।

ऋषयो राक्षसीमाहुर्वाचमुन्मत्तदृप्तयोः,
सा योनिः सर्ववैराणां, सा हि लोकस्य निर्ऋतिः।

इतिह स्म तां निन्दन्ति अथेतरामभिष्टुवन्ति।

कामान् दुग्धे, विप्रकर्षत्यलक्ष्मीं, कीर्त्तिं सूते, दुष्कृतं या हिनस्ति, तां चाग्येतां मातरं मङ्गलानां धेनुं धीराः सूनृतां वाचमाहुः।

सुमं। परिपूतस्वभावोऽयं कुमारः प्राचेतसान्नेवासी वदत्यभिसंपन्नमार्षेण संस्कारेण।

लवः। यत्पुनश्चक्रकेतो वदसि, किन्नु भवतस्तातप्रतापोत्कर्षेऽप्यमर्षइति, तत्पृच्छामि; किं व्यवस्थितविषयाः खल्वधर्मा इति।

सुमं। नैव खलु जानासि तं देवमैक्ष्वाकं, यदेवं वदसि, तद्विरम्यतामतिप्रसङ्गात्।

सैनिकानां प्रमादेन सत्यमोजायितं त्वया,
जामदग्न्यस्य दमने नैवं निर्वक्तुमर्हसि।

लवः ॥ सहासं ॥ आर्य्य, जामदग्न्यस्यापि दमनः स राजा इति; कोऽयमुच्चैर्वादः।

Digitized by Google

विद्वं क्षेत्रदाचि वीर्य्यं द्विजानां, वाक्चोर्वीर्य्यं यत्तु तद्क्षत्रियाणां,
अक्षग्राही ब्राह्मणो जामदग्न्यस्त्विन्द्राग्नेका स्तुतिस्तस्य राज्ञः।

चन्द्र। सोन्मादमिव॥ आर्य्य, आर्य्य, श्रुतमुत्तरोत्तरेण।

कोऽप्येष संप्रति नवः पुरुषावतारो,
वीरो न यस्य भगवान् भृगुनन्दनोऽपि?
पर्य्याप्तसप्तभुवनाभयदक्षिणानि
पुण्यानि तातचरितानि च यो न वेद?

लवः। को हि रघुपतेश्चरितं महिमानञ्च न जानाति। यदि नाम किञ्चिदक्तव्यमस्ति। अथवा, श्रान्तं,

वृद्धास्तेन विचारणीयचरिताश्चिष्ठन्तु कुं वर्त्तते,
सुन्दस्त्रीदमने, ऽप्यखण्डयशसो लोके महान्तो हि ते,
यानि चौरकुतोभयान्यपि पदान्यासन् खरारोधने,
यद्वा कौशलमिक्ष्वणुनिधने. तचाप्यभिज्ञो जनः।

चन्द्र। आस्तातापवादभिन्नमर्य्यादाति नाम प्रगल्भसे।

लवः। अये, मय्येव भ्रुकुटीधरः संवृत्तः?

सुमं। स्फुरितमनयोः क्रोधेन। तथाहि।

चूडामण्डलबन्धनं तरलयत्याकूतजो वेपथुः,
किञ्चित्कोकनदच्छदस्य सदृशे नेत्रे स्वयं रज्यतः;
धत्ते कान्तिमकाण्डताण्डवितयोर्भङ्गेन वक्त्रं भ्रुवो
स्तब्धस्योत्कटखाञ्छनस्य कमलस्योड्डान्तभृङ्गस्य च।

कुमारा। तदितो विमर्दक्षमां भूमिमवतरावः।

॥ इति निष्क्रान्ताः सर्व्वे॥

॥ कुमारविक्रमो नाम पञ्चमोऽङ्कः॥

Digitized by Google

॥ अथ षष्ठोऽङ्कः ॥

॥ ततः प्रविशति विमानोज्ज्वलं विद्याधरमिथुनं ॥

विद्याधरः। अहो नु खलु भोरनयोर्विकर्त्तनकुलकुमारयोरकाण्डकलहकरणप्रचण्डयोरद्योतितचाचलक्ष्मीकाण्डहुतोद्भान्तदेवासुराणि विक्रान्तचरितानि। तथाहि प्रिये, पश्य, पश्य।

मुञ्जज्झणिति कृष्णकाञ्चितकिङ्किणीकं धनु
र्धूनद्रुरुगुणाटनीतकरालकोलाहलं;
वितत्य किरतोः शरानविरतस्फुरच्चूडयो
र्विचित्रमभिवर्द्धते भुवनभीममायोधनं।

विजृम्भितञ्च दिव्यास्त्रं मङ्गलाय द्वयोरपि,
स्तनयित्नोरिवामन्द्रं दुन्दुभेर्दुन्दुमायितं।

तत्प्रवर्त्ततामनयोः प्रवीरयोरनवरतमविरलस्खलितविकटकनकमयकमलकमनीयसंहतिरमरतरुतरुणमुकुलनिकरमकरन्दसुन्दरः पुष्पनिपातः।

विद्याधरी। ता किंति उण अअं अंडतंडविदुद्दुइतरखिदतडिच्छडाकडारमम्बरं मुक्ति संवुत्तं (१)?

---

(१)। तत् किमिति पुनरकाण्डताण्डवितदुर्दण्डतरलित तडिच्छटाकडारमम्बरं मुटिति संवृत्तं।

Digitized by Google

विद्याधरः। तत्किमु खल्वद्य,

लाङ्गूलभ्रमिभ्रान्तमार्त्तण्डज्योतिरध्वजः,

पुटभेदो ललाटस्थनीललोहितचक्षुषः।

॥ विचिन्त्य ॥ आः, ज्ञातं; वत्सेन चक्रकेतुना प्रयुक्तमस्त्रमाग्नेयं, यस्यायमग्निहोत्राग्निपातः। यस्मात हि,

अवदग्धकर्बुरितकेतुचामरै

रपयातमेव हि विमानमण्डलैः,

दधति ध्वजाङ्गुपटाञ्चलेष्विमाः

क्षणकुङ्कुमच्छुरणविभ्रमं शिखाः।

आश्चर्यं, प्रवृत्तएवायमुच्चण्डवज्रखण्डावस्फोटपटुरवस्फुलिङ्गगुरुरत्नाक्षतमुखलेलिहानज्वालासम्भारभैरवो भगवानुषर्बुधः। प्रचण्डस्यास्य सर्व्वतः सन्तापसन्त्रियामङ्गैनाच्छाद्य, दूरमपसरामि॥ तथा करोति॥

विद्याधरी। दिट्ठिआ, एदेण विमलमोत्ताफलसीदलसिणिद्धमसणोवाणमंसलेण णाहदेहफंसेण, आणन्दमन्दमुकुलिदघुण्णन्तलोअणाए अन्तरिदो च्चेव सन्तावो (१)।

विद्याधरः। अपि किमत्र मया कृतं, अथवा,

अकिञ्चिदपि कुर्व्वाणः सौख्यैर्दुःखान्यपोहति,

तत्तस्य किमपि द्रव्यं, यो हि यस्य प्रियोजनः।

---

(१)। दिष्ट्या एतेन विमलमुक्ताफलश्लीतलस्निग्धमसृण सोपानमांसलेन नाथदेहस्पर्शेन, आनन्दमुकुलितघूर्णलोचना था अन्तरितएव सन्तापः।

Digitized by Google

विद्याधरी। कथमविरलविलोलघूर्णायमानविद्युल्लताविलासमण्डितैर्मत्तमयूरकण्ठश्यामलैः श्रीकरीयते नभस्तलं, जलधरैः (१)।

विद्याधरः। हन्त, हन्त; कुमारलवप्रयुक्तवारुणास्त्रप्रभावः खल्वयं; कथमविरलप्रयुक्तवारिधारासंपातैः प्रशान्तं पावकास्त्रं।

विद्याधरी। पिअं मे, पिअं मे (२)।

विद्याधरः। हन्त, हन्त; भोः, भोः; सर्व्वमतिमात्रं दोषाय; यत्प्रबलवातावलिप्तोभगम्भीरगुणगुणायमानमेघमेदुरान्धकारघोरश्रनिबद्धमेकवारविश्वग्रसनविकटविकरालकालकण्ठमुखकन्दरविवर्त्तमानमिवयुगान्तयोगनिद्रानिरुद्धसर्व्वद्वारनारायणोदरनिविष्टमिव भूतजातं प्रवेपते। साधु वत्स चन्द्रकेतो, साधु, स्थाने वाचव्यास्त्रमीरितं।

यतः। विद्याकल्पेन मरुता मेघानां भूयसामपि,
ब्रह्मणीव विवर्त्तानां, क्वापि विप्रलयः कृतः।

---

(१) कथमविरलविलोलघूर्णायमानविद्युल्लताविलासमण्डितैर्मत्तमयूरकण्ठश्यामलैराक्रीर्य्यते नभस्तलं जलधरैः।

(२) प्रियं मे, प्रियंमे।

Digitized by Google

विद्याधरौ। णाध, को दाणिं एसो सम्भमुक्किण्णकरभमिदओत्तम्बलो, दूरदो च्चेव मउरवअणपडिसिद्धजुज्झ्ववावारो एदाणं कुमाराणं अन्तरेण, विमाणवरमोदादेदि? (१)

विद्याधरः॥ हहा॥ एष अम्बूकवधान्निवृत्तो रघुपतिः।

[illegible]॰ अम्बं महापरुषसंविहितं निशम्य,
तद्गौरवात् समुपसंहृतसंप्रहारः,
आम्नो लवः, प्रणत एव स चन्द्रकेतुः,
कल्याणमस्तु सुतसङ्गमनेन रामः।

॥ इति निष्क्रान्तौ॥ विष्कम्भकः॥

ततः प्रविशति रामो लवः प्रणतश्चन्द्रकेतुश्च।

रामः॥ पुष्पकादवतरन्॥

दिनकरकुलचन्द्र, चन्द्रकेतो, सरभसमेहि, दृढं परिष्वजस्व;
तुहिनशकलशीतलैस्त्वदङ्गैः शममुपयातु ममापि चित्तदाहः॥

---

(१) नाथ कथमिदानीं एष स सम्भ्रमोद्धिन्नकरभ्रमितयोश्चाम्बलो दूरतएव मधुरवचनप्रतिषिद्धयुद्धव्यापारएतयोः कुमारयोरन्तरेण विमानवरमवतारयति।

Digitized by Google

चन्द्र। अभिवादये।

रामः॥ उत्थाय सस्नेहाश्रुं परिष्वज्य॥ अपि नाम कुशलं तव दिव्यास्त्रधरदेहस्य।

चन्द्र। कुशलमत्यद्भुतक्रियस्य प्रियदर्शनस्य सवस्याभ्युदयेन। तदिज्ञापयामि, मामिवाविशेषेण, मत्तः प्रियतरेण, चक्षुषा, पश्यत्वमुं महावीरप्रकाण्डं तातः।

रामः॥ लवं निरूप्य॥ दिष्ट्या, अतिकल्याणाकृतिरयं वयस्यो वत्सस्य।

चातुं लोकानिव परिणतः कायवानस्त्रवेदः,
चात्रो धर्मः श्रितइव तनुं ब्रह्मघोषस्य गुप्त्यै,
सामर्थ्यानामिव समुदयः, सत्त्वयो वा गुणानां
माविर्भूय स्थितइव जगत्पुण्यनिर्माणराशिः।

लवः। अहो, पुण्यानुभावदर्शनोऽयं महापुरुषः।

आश्वासस्नेहभक्तीनामेकमालम्बनं महत्।
प्रसन्नस्येव धर्मस्य प्रसादो मूर्त्तिमत्तरः,

आश्चर्यं!

विरोधो विश्रान्तः प्रसरति, रसो निर्दलितघन
स्तदौद्धत्यं क्वापि व्रजति, विनयः प्रक्षयति मां
घटित्यस्मिन् दृष्टे किमपि परवानस्मि, यदि वा
महार्घस्त्रीर्णानामिव हि महतां कोऽप्यतिशयः।

Digitized by Google

रामः। तत्किमेकपदएव दुःखविश्रामंददात्युपक्षेपति च कुतोऽपि निमित्तादन्तरात्मानं; अथवा, खेदस्य निमित्तमन्यपेक्षतइति विप्रतिषिद्धमेतत्।

व्यतिषजति पदार्थानान्तरः कोऽपि हेतु
र्न खलु बहिरुपाधीन् प्रीतयः संश्रयन्ते;
विकसति हि पतङ्गस्योदये पुण्डरीकं,
द्रवति च हिमरश्मावुद्गते चन्द्रकान्तः।

लवः। चन्द्रकेतो, कएते?

चन्द्र। प्रियवयस्य, ननु तातपादाएते।

लवः। ममापि तर्हि धर्मतस्तथैव यतः प्रियवयस्य इत्या त्थ, किन्तु चत्वारः खलु भवतामेवं व्यपदेशभागिनस्तद्भवन्तो रामायणकथापुरुषास्तदिशेषं ब्रूहि।

चन्द्र। ननु ज्येष्ठतातपादाइत्यवेहि।

लवः॥ सोल्लासं॥ कथं रघुनाथएष! दिष्ट्या सुप्रभातमद्य, यदयं देवो दृष्टः॥ सविनयकौतुकं निर्वर्ण्य॥ तात, प्राचेतसा न्नेवाषी लवोऽभिवादयते।

रामः॥ सस्नेहं॥ आयुष्मन्नेहेहि॥ सस्नेहं परिष्वज्य॥ अपि वत्स, कृतं कृतमतिविनयेन, अनेकवारमपरिक्षतं परिष्वजस्व।

परिणतकठोरपुष्करगर्भच्छदपीनमसृणसुकुमारः,
नन्दयति चन्द्रचन्दननिस्यन्दजडस्तव स्पर्शः।

Digitized by Google

लवः ॥ स्वगतं ॥ दृष्टशोऽस्मादृशान् प्रति अमीषामकारणक्रोधः, अथवा पुनरेभ्य एवाभिदुग्धमस्त्रेण, यदायुधपरिग्रहं यावदत्यारूढो दुर्योगः ॥ प्रकाशं ॥ मृष्यन्त्विदानीं लवस्य वाग्भिरमी तातपादाः।

रामः। किमपराद्धं वत्सेन।

चन्द्र। अश्वानुयाचिकेभ्यस्तातप्रतापाविष्करणमुपश्रुत्य वीरायितमनेन।

रामः। नन्वयमलङ्कारः खलु लवस्य।

न तेजस्तेजस्वी प्रहृतमपरेषां प्रसहते,
स तस्य स्वो भावः प्रकृतिनियतत्वादकृतकः;
मधूच्छैरश्रान्तं तपति यदि देवो दिनकरः,
किमाग्नेयो यावा निहतदव तेजांसि वमति।

चन्द्र। तात, अमर्षोऽप्यस्यैव शोभते वीरस्य; परन्तु हि तात, प्रियवयस्यविनियुक्तजृम्भकास्त्रनिष्क्रम्यस्तम्भितानि सर्वतः सैन्यानि।

रामः ॥ विलोक्य ॥ वत्स, लव, संहियन्तामस्त्राणि; त्वमपि चन्द्रकेतो, निर्व्यापारविलक्षितानि यान्वय बलानि।

लवः ॥ प्रणिधानं नाटयति ॥

चन्द्र। यथादिष्टमिति ॥ निष्क्रान्तौ ॥

लवः। प्रशान्तमस्त्रं।

रामः। वत्स, सरहस्यजृम्भकप्रयोगसंहरणान्यस्त्राणि आम्नायवन्ति।

ब्रह्मादयो ब्रह्महिताय तस्मै परःसहस्राः सरहस्यपांसि,
एतान्यपश्यन् गुरवः पुराणाः स्वान्येव तेजांसि तपोमयानि।

अथैतन्मन्त्रपारायणोपनिषदं भगवान् कृशाश्वः, परःसह स्वपरिवत्सरान्तेवासिने कौशिकाय विश्वामित्राय प्रोवाच, स तु भगवान् मह्यमित्येष तु पूर्व्वानुक्रमः; कुमारकस्य पुनः कुतः सम्प्रदायदृति पृच्छामि।

लवः। स्वतःप्रकाशान्यावयोरस्त्राणि।

रामः ॥ विचिन्त्य ॥ प्रकृष्टपुण्यपरिपाकोपादानः कोऽपि महिमा स्यात्? द्विवचनन्तु कथं?

लवः। भ्रातरावावां यमजौ।

रामः। स तर्हि द्वितीयः क्व?

नेपथ्ये॥ भाण्डायन, भाण्डायन।

आयुष्मतः किल लवस्य नरेन्द्रसैन्यै
रायोधनं ननु किमात्य सखे तथेति
अद्यास्तमेतु भुवनेष्वधिराजशब्दः;
चक्रस्य शस्त्रशिखिनः शममद्य यान्तु।

Digitized by Google

रामः। अथ कोऽयमिन्द्रमणिमेचकच्छवि
र्ध्वनिनैव दत्तपुलकं करोति मां?
नवनीलनीरधरधीरगर्जितः
क्षणबद्धकुड्मलकदम्बडम्बरं।

लवः। अयमसौ मम ज्यायानार्यः कुशो नाम, भरता अमात्प्रतिनिवृत्तः।

रामः। सकौतुकं॥ वत्स, इत एवाकृष्यैनमप्यायुष्मन्तं।

लवः। एवमिति परिक्रामति॥

॥ ततः प्रविशति कुशः॥

कुशः। साद्भुतहर्षधैर्य्यं धनुरास्फालयन्॥
दत्तेन्द्राभयदक्षिणैर्भगवतो वैवस्वतादामनो
दृप्तानां दहनाय दीपितनिजक्षत्रप्रतापाग्निभिः,
आदित्यैर्यदि विग्रहो नृपतिभिर्धन्यं ममैतत्ततो
दिव्यास्त्रस्फुरदुग्रदीधितिशिखानीराजितज्यं धनुः।

॥ विकटं परिक्रामति॥

रामः। कोऽप्यस्मिन् क्षत्रियपोतके पौरुषातिरेकः।
दृष्टिस्तृणीकृतजगत्त्रयसत्वसारा;
धीरोद्धता नमयतीव गतिर्द्धरित्रीं;
कौमारकेऽपि गिरिवद्गुरुतां दधानो,
वीरो रसः किमयमेत्युत दर्पएव।

लवः॥ उपसृत्य॥ जयत्वार्य्यः।

Digitized by Google

कुशः। मन्दायुष्मन्, किमिदं वार्त्ता; युद्धं युद्धमिति।

लवः। यत्किञ्चिदेतदुरहृदयभावमुत्सृज्यार्य्योऽस्मिन् विनयेन वर्त्तताम्।

कुशः। किमर्थं?

लवः। अत्र देवो रघुपतिस्थिरति। सत्र स्थिरत्वावयोरुत्कण्ठते च युष्मत्सन्निकर्षस्य।

कुशः॥ सतर्कं॥ स रामायणकथानायको; ब्रह्मघोषस्य गोपायिता।

लवः। अथकिं।

कुशः। आराधनीयपुण्यदर्शनः स महात्मा किन्तु कथमस्माभिरुपगन्तव्यइति न सम्प्रधारयामि।

लवः। यथा गुरुस्तथोपचारेण।

कुशः। अपि कथं नामैतत्।

लवः। अत्युदात्तसुजनसुन्दरकेतुरौर्म्मिलेयः, प्रियवयस्य, इति सख्येन मामुपतिष्ठते; तेन, तत्सम्बन्धेन च, धर्म्मतात एवायं राजर्षिरिति।

कुशः। संप्रति करणीयो राजन्येऽपि प्रश्रयः।

लवः। यस्यालेनमाकारानुभावगाम्भीर्य्यसम्भाव्यमानविधिलोकोत्तरचरितातिशयमार्य्यं महापुरुषं।

कुशः॥ निर्व्वर्ण्य॥

अहोप्रामोदिकं रूपमनुभावश्च पावनः।
स्थाने रामायणकविर्देवीं वाचं व्यवीवृधत्।

Digitized by Google

॥ उपसृत्य ॥ तात, प्राचेतसाश्रमवासी कुशोऽभिवादयते।

रामः। एह्यायुष्मन्।

अमृताघ्रातजीमूतस्निग्धसंहननस्य ते,
परिष्वङ्गस्य वात्सल्यादयमुत्कण्ठते जनः।

॥ परिष्वज्य स्वगतं॥ तत्किमपत्यमयं दारकः?

अङ्गादङ्गात्सुतादेव निजस्नेहजो देहसारः,
प्रादुर्भूय स्थितादेव बहिस्चेतनाधातुरेव;
सान्द्रानन्दक्षुभितहृदयप्रस्रवेणावसृष्टो
गात्रस्पर्शे यदमृतरसस्रोतसा सिञ्चतीव।

सवः। तात, ललाटन्तपो घर्मदीधितिस्तदत्र शाखाछाये मुहूर्तमासनपरिग्रहं करोतु तातः।

रामः। यदभिरुचितं वत्साय ॥ परिक्रम्योपविशन्ति ॥

रामः ॥ स्वगतं॥

अहो प्रश्रयस्नेहेऽपि गतिस्थित्यासनादयः,
स्वाभाव्यमंशिनो भावाः, कुशस्य च लवस्य, च।
वपुरविहितसिद्धाएव लक्ष्मीविलासाः,
प्रतिजनकमनीयं कान्तिमत्केतयन्ति;
अनभिनमिव रूपं रूपयत्ते मनोज्ञा,
विकसितमरविन्दं विन्दवो मारकरन्दाः

Digitized by Google

भूयिष्ठञ्च रघुकुमारकाधामनयोः पश्यामि ।

कठोरपारावतकण्ठमेचकं, वपुर्दृषत्स्कन्धमवन्धुरांसयोः,
प्रसन्नसिंहस्तिमितञ्च वीक्षितं, ध्वनिञ्च मार्जन्मृदङ्गमांसलः।

॥ सूच्यंकिरूप्य ॥ अथि न केवलमस्मदङ्गसंवादिन्याकृतिः ।

अपि जनकसुतायास्तच्च तथानुरूपं,
स्फुटमिह जिघ्रुयुग्मे नैपुणोन्मेयमस्ति ;
ननु पुनरिव तस्मे गोचरीभूतमक्ष्णो
रभिनवव्रतपत्रश्रीमदास्यं प्रियायाः।

मुक्ताच्छदन्मच्छविदन्तुरेयं, सैवाष्टमुद्रा, स च कर्णपाशः,
नेत्रे पुनर्यद्यपि रक्तनीले, तथापि सौभाग्यगुणः स एव।

तदेतत् प्राचेतसाश्रमपदं, यत्र किल देवी परित्यक्ता, दूयं चानयोराकृतिर्वर्तते। यद्यपि, स्वतःप्रकाशान्यस्त्राणीति तत्र विस्मृषामि ; अपि खलु तच्चिरदर्शनप्रासङ्गिकमस्त्राभ्यनुज्ञानमनुद्भूतं स्यात्, नन्वसांप्रदायिकान्यस्त्राणीति पूर्व्वेषामप्यनुद्भूतश्रमः ; अथच्च संभवमानमात्मानं सुखातिशयोद्वेदयत्य मे विप्रलभते ; भूयिष्ठञ्च, मया द्विधा प्रतिपन्नो देव्या गर्भिणीभाव आसीत् ॥ यावत् ॥

पुरा रूढे स्नेहे परिचयविकासादुपचिते
रहोविस्रब्धाया अपि सहजलज्जाजडतया ;
मयैवादौ ज्ञातः करतलपरामर्शकलया
द्विधा मर्म्मग्रन्थिस्तदनु दिवसैः कैरपि तया ?

Digitized by Google

॥ रुदित्वा ॥ तत्किमेतौ पृच्छामि केनाप्युपायेन।

लवः। तत्किमेतत्।

वाष्पवर्षेण नीतं वो जगन्मङ्गलमानतं;
अवश्यायावसिक्तस्य पुण्डरीकस्य चारुतां।

कुशः। अयि वत्स;

विना सीतादेव्या किमिव हि न दुःखं रघुपतेः;
प्रियानाशे क्षन्तुं किल जगदरण्यं हि भवति;
स च स्नेहस्रावानयमपि वियोगो निरवधिः;
किमित्येवं पृच्छन्ननधिगतरामायणइव।

रामः॥ स्वगतं॥ अये तटस्थित आलापः; क्षन्तं प्रश्नेन। दग्धहृदय कोऽयमाकस्मिकः स्नेहपरिप्लवो विकारः? एवञ्च निर्भिन्नहृदयावेगः शिशुजनेनाप्यनुकम्पितोऽस्मि; भवतु तावदन्तरयामि॥ प्रकाशं॥ वत्सौ, रामायणमिति श्रूयते, भगवतो वाल्मीकेः सरस्वतीनिस्यन्दः, प्रशस्तिरादित्यवंशस्य; तच्च कौतूहलेन यत्किञ्चिच्छ्रोतुमिच्छामि।

कुशः। स क्षन्तएव सन्दर्भोऽस्माकमावृत्तः; स्मृतिप्रत्युपस्थितौ तावदिमौ बालचरितस्यान्तेऽध्याये द्वौ श्लोकौ।

रामः। उदीरयतु वत्सः।

कुशः। प्रकृत्यैव प्रिया सीता रामस्यासीन्महात्मनः;
प्रियभावः स्वतु तथा स्वगुणैरेव वर्द्धितः;

Digitized by Google

तथैव रामः सीतायाः प्राणेभ्योऽपि प्रियोऽभवत्;
हृदयं लेव जानाति प्रीतियोगं परस्परं। इति।

रामः। कष्टमतिदारुणो हृदयमर्म्मोपघातः, हा देवी, एवं किल तदाशीत्। अहो निरन्वयविपर्य्यासविरसवृत्तयो विप्रलम्भपर्य्यवसायिनस्तापयन्ति संसारवृत्तान्ताः।

क्व तावानानन्दो विरतिभयविस्रम्भवहलः,
क्व तेऽन्योन्यं यत्नाः, क्व च न गहनाः कौतुकरसाः;
सुखे वा दुःखे वाक्कमु खलु तदेकं हृदययो
स्तथाप्येष प्राणः स्फुटति, न तु पापो विरमति।

भाः कष्टं।

प्रियागुणसहस्राणामेकोन्मीलनपेशलः,
अएव दुःसारः कालस्तमेव स्मारितावयम्।
तदा किञ्चिल्किञ्चित्कृतपदमहोभिः कतिपयै
स्तदीषद्विस्रारिस्तनयुगलमासीन्मृगदृशः;
वयः स्नेहाकूतव्यतिकरघनो यच्च मदनः,
प्रगल्भव्यापारः स्फुरति हृदि मुग्धस्य वपुषि।

कुशः। अयञ्च मन्दाकिनीचित्रकूटवनविहारे सीतादेवीमुद्दिश्य रघुपतेः शोकः।

त्वदर्थमिव विन्यस्तः शिलापादोऽयमग्रतः,
यस्यायमभितः पुष्पैः प्रवृत्तइव केसरः।

Digitized by Google

रामः॥ सस्मितसस्नेहकरुणं॥ अति गाढार्तः मुग्धः अग्नि-जनो विश्रब्धतल्पशरणपरः। हा देवि, अरुन्धति वा तत्र प्रदेशस्थ तत्समयविस्रब्धातिप्रणयप्रसङ्गस्य; भोः कष्टं!

अमामुन्निद्रिरीभवत्प्रसृतमन्दमन्दाकिनी,
मरुत्तरलितालकाकुललललाटचन्द्रद्युतिः;
अकुङ्कुमकलङ्कितोज्ज्वलकपोलमुत्प्रेक्षते,
निराभरणसुन्दरश्रवणपाशसौम्यं मुखं।

॥ खिन्नदव खिन्ना ॥ सकरुणं॥ अहो नु खलु भोः।

चिरं ध्यात्वा, ध्यात्वा, निहितदव निर्माय पुरतः,
प्रवासेऽप्याश्वासं न खलु न करोति प्रियजनः
जगज्जीर्णारण्यं भवति, हि, विकल्पव्युपरमे,
कुकूलानां राशौ तदनु हृदयं पच्यत दव।

नेपथ्ये॥

वशिष्ठो, वाल्मीकिर्भरथभद्धिथोऽथ, जनकः,
सहैवारुन्धत्या अग्निकलहमाकर्ण्य सभयाः,
जरायत्नैर्गात्रैरथ खलु विदूराश्रमतया
चिरेणागच्छन्ति, त्वरितमनसोऽपि श्रमजडाः।

रामः। कथं, भगवन्तावरुन्धतीवशिष्ठौ, अम्बा, जनकश्चात्रैव कथं खल्वेते द्रष्टव्याः॥ सकरुणं विलोक्य॥ अहह, तातजनकस्तु दैवादत्रैवायातइति वज्रेणेव ताडितोऽस्मि मन्दभाग्यः।

सम्बन्धस्मृहणीयताप्रमुदितैर्जुष्टं वसिष्ठादिभि
र्दृष्टापत्यविवाहमङ्गलमहो तत्तातयोः सङ्गतं,
पश्यन्नीदृशमीदृशे पिहसखं वृत्ते महावैभवे
दीर्घैः किं न सहस्रधाहमथ वा रामेण किं दुष्करं।

नेपथ्ये ॥ कष्टं कष्टं ॥

अनुभावमाचरितमुपस्थितश्रियं सहसैव वीक्ष्य रघुनाथमीदृशं,
प्रथमप्रमूढजनकप्रबोधनादिधुराः प्रमोहमुपयान्ति मातरः।

रामः। हा तात, हा मातरः, हा जनक;

जनकानां रघूणाञ्च यत्कृत्यं गोचरङ्गतं,
तस्मिन्नकरुणे पापे वृथा वः करुणा मयि।

यावत्संभावयामि ॥ इत्युत्तिष्ठन्ति ॥

कुशलवौ। दृतदृतस्तातः ॥ सकरुणाकुलं परिक्रम्य सर्व्वे निष्क्रान्ताः ॥

॥ कुमारप्रत्यभिज्ञानो नाम षष्ठोऽङ्कः ॥

Digitized by Google

अथ सप्तमोऽङ्कः।

ततः प्रविशति लक्ष्मणः।

लक्ष्मणः। भो भोः, किन्न खलु भगवता वाल्मीकिना सप्रश्रयं चन्द्रपौरजानपदाः प्रजाः सहास्माभिराहूय, छत्वएव सदेवासुरमनुष्यतिर्य्यगुरगनायकनिकायसन्तानस्य जङ्गमो भूतग्रामः स्वप्रभावेण सन्निधापितः। आदिष्टस्याहमार्य्येण; वत्स लक्ष्मण, भगवता वाल्मीकिना स्वकृतिमप्सरोभिः प्रयुज्यमानां द्रष्टुमुपनिमन्त्रिताः स्मः, तद्गङ्गातीरमातोद्यस्थानमुपगम्य, क्रियतां समाजसन्निवेशइति। छतश्च मर्त्यामर्त्यस्य भूतग्रामस्य समुचितस्थाने समुपवेशयङ्गो मया; अयन्तु,

राज्याश्रमनिवासेऽपि प्राप्तकष्टमुनिव्रतः,
वाल्मीकिगौरवादार्य्य, इतएवाभिवर्त्तते।

ततः प्रविशति रामः।

रामः। वत्स लक्ष्मण, अपि स्थिता रङ्गप्रेक्षकाः।

लक्ष्म। अथकिं।

रामः। द्वौ पुनर्वत्सौ कुशलवौ चन्द्रकेतुसदसीं स्वाम प्रतिपत्तिं लम्भयितव्यौ।

Digitized by Google

लक्ष्म। प्रभुस्नेहप्रत्ययात्तथैव कृतं; इदं त्वासीनौ राजासनं, उपविशतमार्यौ।

रामः ॥ उपविशति ॥ उभावुपविशतः ॥

रामः। प्रस्तूयतां भोः।

॥ प्रविश्य सूत्रधारः ॥ भगवान् भूतार्थवादी प्राचेतसः, सजङ्गमस्थावरं जगदाज्ञापयति, यदिदमस्माभिरार्षेण चक्षुषा समुदीक्ष्य पावनकरुणाद्भुतरसं किञ्चिदुपनिबद्धं, तच्च कार्य्यं गौरवादवधातव्यमिति।

रामः। एतदुक्तं भवति। साक्षात्कृतधर्म्माणऋषयस्तेषां मन्त्रतसाराणि भगवतां परोरजांसि प्रज्ञानानि, न क्वचिद्वाङ्मात्रव्यत्यनभिज्ञङ्मन्यानीति।

नेपथ्ये।

हा अज्ज उत्त, हा कुमार लक्खण, एआरणिं मन्दभाइणिं अरणं अरण्णे आसन्नप्पसववेअणं हदासं सावआ मं अहिलसन्ति; सा दाणिं मन्दभाइणी भाईरधीए अत्ताणअं णिक्खिवित्तं (१)।

---

(१) हा आर्य्यपुत्र, हा कुमार लक्ष्मण, एकाकिनीं मन्दभागां अरणां अरण्ये आसन्नप्रसववेदनां हतामां श्वापदा मामभिलषन्ति; सेदानीं मन्दभागिनी भागीरथ्यामात्मानं निक्षिप्यते।

Digitized by Google

लक्ष्म। आत्मगतं ॥ कष्टं वतान्यदेव किमपि ?

सूच। विश्वम्भरात्मजा देवी राज्ञा त्यक्ता महावने,
प्राप्तप्रसवमात्मानं गङ्गादेव्यां विमुञ्चति।

॥ इति सूचधारो निष्क्रान्तः ॥

रामः। देवि, क्षणमपेक्षस्व।

लक्ष्म। आर्य्य, नाटकमिदं, नाटकमिदं।

रामः। हा देवि, दण्डकारण्यवासप्रियसखि, एष ते रामाद्दैवदुर्विपाकः।

लक्ष्म। आर्य्य, दृश्यतां तावत् प्रबन्धार्थः।

रामः। एष सज्जोऽस्मि वज्रमयः।

॥ ततः प्रविश्यत्युत्सङ्गितैकैकदारकाभ्यां पृथ्वीगङ्गाभ्यामवलम्बिता सीता ॥

रामः। वत्स, लक्ष्मण, असंविज्ञातमनिबन्धनं तमद्य प्रविशामि, धारय मां।

गङ्गा। समाश्वसिहि, कल्याणि, दिष्ट्या वैदेहि वर्द्धसे,
अन्तर्जलं प्रसूतासि रघुवंशधरौ सुतौ।

सीता ॥ समाश्वस्ता ॥ दिट्ठिआ दारके पस्सदम्हि, हा अज्ज उत्त ॥ इति मूर्च्छति ॥ (१)।

---

(१)। दिष्ट्या दारकौ प्रसूतास्मि, हा आर्य्यपुत्र।

Digitized by Google

लक्ष्म ॥ पादयोर्निपत्य ॥ आर्य्यार्य्य, दिष्ट्या वर्द्धामहे; कल्याणप्ररोहो रघुवंशः ॥ विलोक्य ॥ हा, हा; कथं क्षुभितवाप्योत्पीडनिर्भरः, प्रमुग्ध एवार्य्यः ॥ इति वीजयति ॥

देव्यौ। वत्से, समाश्वसिहि, समाश्वसिहि।

सीता ॥ आश्वस्य ॥ भगवति, का त्वं, दृश्यसे ? (१)

पृथ्वी। दृश्यते श्वशुरकुलदेवता भागीरथी।

सीता। भगवति, नमो ते, नमो ते (२)।

भागी। चारित्रोपचितां कल्याणसम्पदमनुगच्छ।

लक्ष्म। अनुगृहीताः स्मः।

भागी। दृश्यस्तु जननी ते वसुन्धरा।

सीता। हा अम्म, ईदिसी अहं तए दिट्ठा (३)।

पृथ्वी। एहि वत्से, एहि पुत्रि ॥ इति सीतामालिङ्ग्य मूर्च्छति॥

लक्ष्म ॥ सहर्षं ॥ पृथ्वीगङ्गाभ्यामभ्युपपन्ना आर्य्या।

रामः ॥ अवलोक्य ॥ दिष्ट्या खल्वेतत् करुणतरं वर्त्तते; विश्वम्भरापि नाम व्यथते, इति जितमपत्यस्नेहेन, यद्वा सर्व्वसाधारणो ह्येष मानसो मोहग्रन्थिरन्तस्सरस्येतनावतामुपप्लवः संसारतन्तुः।

---

(१)। भगवति, का त्वं, दृश्यसे?

(२)। भगवति, नमस्ते, नमस्ते।

(३) हा अम्म, ईदृशी अहं त्वया दृष्टा।

Digitized by Google

गङ्गा। वत्से वैदेहि, देवि, भूतधात्रि, समाश्वसिहि।

पृथ्वी॥ आश्वस्त ॥ देवि, सीतां प्रसूय कथमाश्वसिमि? एकस्मिरं राक्षसमध्यवासः साङ्को, द्वितीयस्य सुदुःश्रवोऽस्याः।

भागी। को नाम पाकाभिमुखस्वजन्मोर्द्वाराणि दैवस्य पिधातुमीष्टे?

पृथ्वी। भागीरथि, सदृशमुक्तं। युक्तमेतद्वा रामभद्रस्य।

न प्रमाणीकृतः पाणिर्वाल्ये बालेन पीडितः;
नाहं, न जनको, नाग्निर्नानुवृत्तिर्न सन्ततिः।

सीता। अज्जउत्तं सुमराविदह्मि? (१)

पृथ्वी। आः कस्यवार्य्यपुत्रः?

सीता॥ सलज्जास्मं॥ जधा वा, अम्मा भणादि (२)।

रामः। अम्ब पृथ्वि, ईदृशोऽस्मि।

गङ्गा। भगवति वसुन्धरे, शरीरमसि संसारस्य, तत्किमसम्बिदानेव जामाचे कुप्यसि?

घोरं लोके विततमयशो, या च वक्त्रो विभुद्धि
र्लङ्कादीपे कथमिव जनस्तामिह श्रद्दधातु;
दृष्वाकूणां कुलधनमिदं, यत्समाराधनीयः,
क्षत्त्वो लोकस्तदतिगहनं किं स वत्सः करोतु?

---

(१)। हा आर्य्यपुत्रं स्मारिताऽस्मि।

(२)। यथा वा अम्बा भणति।

Digitized by Google

सञ्ज्ञा। अम्बाहतात्मानःप्रकाशा हि देवता भूतेषु; विशेषेण गङ्गा; तथाह्येव तेऽञ्जलिः।

रामः। अम्ब, अनुगृह्यतामयं मयीरचरहे प्रसादः।

पृथ्वी। देवि, नित्यप्रसन्नास्मि वः किन्त्वापातदुःसहस्नेहस्या वेगेनैवं ब्रवीमि, न पुनर्न जानामि सीतास्नेहं रामभद्रस्य।

दह्यमानेन मनसा दैवादस्मां विहाय यः
शोकोत्तरेण सत्वेन प्रजापुण्येषु जीवति।

रामः। सकरुणा हि गुरवो गर्भरूपेषु।

सीता॥ रुदती कृताञ्जलिः॥ णेदु मं अत्तणो अङ्केसु विस्सम्भंभवा (१)।

रामः। किमन्यद्ब्रवीतु।

गङ्गा। आर्ये; अविस्मीना वत्सरसहस्राणि भूयाः।

पृथ्वी। वत्से, अपि रक्षणीयौ ते पुत्रकौ।

सीता। अणाधाम्हि (२)।

रामः। हृदय वज्रमयमसि।

गङ्गा। कथं त्वं सनाथाप्यनाथा।

सीता। कीदिसी मम अभव्वाए सणाधत्तणा (३)।

---

(१)। नयतु मामात्मनोऽङ्केषु विस्रम्भं, अम्बा।

(२)। अनाथास्मि।

(३)। कीदृशी ममाभव्यायाः सनाथता।

Digitized by Google

देव्यौ। अगस्त्यकुलमात्मानं कथं लघवमन्यसे?

आवयोरपि यत्पूज्यात् पवित्रत्वं प्रलप्स्यते।

लक्ष्म। आर्य्य, श्रुतं।

रामः। शृणोतु लोकः।

॥ नेपथ्ये कलकलः॥

रामः। अद्भुततरं किमपि?

सीता। किंस्वित् अन्तरिक्षं पर्य्याकुलं? (१)

देव्यौ। ज्ञातं।

क्षणाम्बः कौशिको रामइति येषां गुरुक्रमः,

आविर्भवन्ति तान्येव अस्त्राणि सह जृम्भकैः।

॥ नेपथ्ये ॥

देवि सीते, नमस्तेऽस्तु, गतिर्नः पुत्रको हि ते;

आलेख्यदर्शने देवो, यदाह रघुनन्दनः।

सीता। दिष्ट्या अस्त्रदेवताश्चो परिस्फुरन्ति (२)।

लक्ष्म। उक्तमासीदार्य्येण, सर्व्वथेदानीं लघ्वसवमुपस्थास्यन्तीति।

देव्यौ। नमो वः परमास्त्रेभ्यो, राघवस्य परिग्रहात्,

अनुध्यातैरुपेतव्यं वत्सयोर्भद्रमस्तु वः।

---

(१) किमिति अन्तरीक्षं पर्य्याकुलं।

(२)। दिष्ट्या अस्त्रदेवताः परिस्फुरन्ति।

Digitized by Google

रामः। क्षुभिताः कामपि दशां कुर्वन्ति मम साम्प्रतं,
विस्मयानन्दसन्दर्भजर्जराः करुणोर्मयः।

देव्यौ। मन्यस्व, वत्से, रामभद्रतुल्यविदार्गीमे पुत्रकौ सम्वृत्तौ।

सीता। भगवदरुन्धती, को एदाणं खत्तिओचिदं कम्मं करइस्सदित्ति (१)?

रामः। एषां वसिष्ठगुप्तानां रघूणां वंशवर्द्धिनी,
कष्टं, सीतापि, सुतयोः संस्कर्त्तारं न विन्दति।

देव्यौ। पुत्रि, किं तवानया चिन्तया? एतौ हि वत्सौ सत्य व्यागात्परेण भगवतो वाल्मीकेरर्पयिष्यावः; स एवैतयोः चत्र स्वत्यं करिष्यति।

यथा वसिष्ठाङ्गिरसावृषी प्राचेतसस्तथा;
जनकानां रघूणाञ्च वंशयोरुभयोर्गुरुः।

रामः। सुविचिन्तितं भगवतीभ्यां।

सीता। आर्य्य, सत्यं विज्ञापयामि, तैस्तैरुपायैर्वत्सौ कुश लवावुल्लेचे।

एतौ हि जन्मविद्धास्त्रौ जातौ; प्राचेतसाम्मुनेः,
वीरौ सम्प्राप्तसंस्कारौ; वयसा द्वादशाब्दिकौ।

रामः। वत्स, इति परिष्वजमानहृदयः सम्मुखोऽस्मि।

---

(१)। भगवत्यौ, कः एतयोः क्षत्रियोचितं कर्म करिष्यति?

Digitized by Google

पृथ्वी। एहि वत्से, पवित्रीकुरु रसातलं।

रामः। हा प्रिये, लोकान्तरमसि गता?

सीता। णेदु मं अत्तणो अङ्केसु णिलअं अम्बा, ण सक्कम्मि ईदिसं जीअलोअपरिवुत्तं अणुभविदुं (१)।

रामः। किमुत्तरं स्यात्।

पृथ्वी। स्वन्यत्यागं यावन्मन्नियोगतः पुत्रकयोरपेक्षस्व परेण ते यथा रोचिष्यते।

गङ्गा। एवं नाम।

॥ ततो निष्क्रान्ता गङ्गा पृथ्वी, सीताः ॥

रामः। कथं विलयएव वैदेह्याः सम्पन्नः! हा देवि, दण्डकारण्यवासप्रियसखि, हा चारित्रदेवते, लोकान्तरं पर्य्यवसितासि, ॥ इति मुह्यति ॥

लक्ष्म। भगवन्वाल्मीके, परित्रायस्व, एष ते काव्यार्थः। नेपथ्ये॥ अपनीयतामातोद्यकं। भो भोः, सजङ्गमस्थावराः प्राणभृतो मर्त्यामर्त्याः, पश्यत, महर्षिणा भगवता वाल्मीकिना अनुज्ञातं पवित्रमाश्चर्य्यं।

लक्ष्म ॥ विलोक्य ॥

मन्थादिव क्षुभ्यति गाङ्गमम्भो, व्याप्तञ्च देवर्षिभिरन्तरीक्षं,
आश्चर्य्यमार्य्या सह देवताभ्यां गङ्गामहीभ्यां सलिलादुपैति।

---

(१)। नयतु मामात्मनोऽङ्केषु विलयं अम्बा, न शक्नोम्यहं ईदृशं जीवलोकपरिवर्त्तमनुभवितुं।

Digitized by Google

पुनर्नेपथ्ये ॥

अरुन्धति जगद्वन्द्ये, गङ्गापृथ्व्यौ भजस्व नौ,
अर्पितेयं तवाभ्यासे सीता पुत्रव्रता वधूः।

लक्ष्म। दिष्ट्या, अहो आर्य्यस्य आर्य्यं, आर्य्यार्य्य, पश्य, पश्य। कष्टमद्यापि नोच्छ्वसित्यार्य्यः।

॥ ततः प्रविश्यारुन्धती सीता च ॥

अरु। लरख वत्से वैदेहि, मुञ्च शोकेनशोकतां,
एहि, जीवय मे वत्सं, प्रियस्पर्शेन पाणिना।

सीता ॥ सम्भ्रमं रूपयन्ती ॥ समस्सिद्धु, अज्जउत्तो (१)।

रामः ॥ समाश्वस्य सानन्दं ॥ भोः किमेतत् ॥ दृष्ट्वा सहर्षाद्भुतं ॥ कथं देवी ॥ सलज्जस्मितं ॥ अम्बा अरुन्धती, सर्वे प्रहृष्यद्दृष्यद्भुक्ष्मान्तापसेता गुरवः।

अरु। वत्स, एषा भगीरथयशोहरदेवता सुप्रसन्ना गङ्गा।

नेपथ्ये ॥ जगत्पते रामचन्द्र, सभ्यर्य्यताम् लेखदर्शने मां प्रत्यात्मनो वचनं; यथा सालमम्ब धर्मतः क्षुधायामरुन्धतीव सीतायां शिवानुध्यानपरा भवेति, तचानृणास्मि जाता।

अरु। दृयं ते स्वस्रूर्भगवती वसुन्धरा।

---

(१)। समाश्वसितु आर्य्यपुत्रः।

नेपथ्य। उक्तञ्च पूर्व्वमायुष्मता वत्सात्यागे; यथा, भगवति वसुन्धरे श्राध्यां दुहितरमवेक्ष्य जानकीं, तदनुनाकृतवचनास्मि प्रभोर्वत्सलेति।

रामः। कथं कृतमहापराधो भगवतीभ्यामनुकम्पितः प्रणमामि।

अरु। भो भोः पौरजानपदा, भगवतीभ्यां जाह्नवीवसुन्धराभ्यामेवं प्रशस्यमाना, मम अरुन्धत्याः समर्पिता, पूर्व्वञ्च भगवता वैश्वानरेण निर्शोतपुण्यचारित्रा, सप्तर्षिकैश्च देवैः संस्तुता, साविचदेवकुलवधूर्देवयजनसम्भवा सीता, देवो, परिगृह्यतामिति; कथं भवन्तो मन्यन्ते।

लक्ष्म। एवमार्य्यायाऽरुन्धत्या निर्भर्त्सिताः प्रजाःकृत्वञ्च भूतयाम आर्य्यां नमस्करोति; लोकपालाश्च, सप्तर्षयश्च पुष्प, वृष्टिभिरुपतिष्ठन्ते।

अरु। जगत्पते रामभद्र,

नियोजय यथाधर्म्मं प्रियां त्वं धर्म्मचारिणीं,
हिरण्मय्याः प्रतिकृतेः पुण्यप्रकृतिमध्वरे।

सीता ॥ स्वगतं ॥ जाणादि, अज्जउत्त, सीतादुक्खं पमज्जिदुं(१)।

---

(१)। जानासि आर्य्यपुत्र सीतादुःखं प्रमार्जितुं।

रामः। यथा भगवत्यादिशति।

लक्ष्म। कृतार्थोऽस्मि।

सीता। जीविदच्छि (१)।

लक्ष्म। आर्ये, एष निर्लज्जो लक्ष्मणः प्रणमति

सीता। वच्छ, ईदिसोवि चिरञ्जीव (२)।

अरु। भगवन् वाल्मीके उपनीयेतामिमौ सीतागर्भसम्भूतौ रामभद्रस्य कुशलवौ ॥ इति निष्क्रान्ता॥

रामलक्ष्मणौ। दिष्ट्या तथैव तत्।

सीता ॥ सवाष्पाकुला॥ कहिं ते पुत्तका मे (३)।

॥ ततः प्रविशति वाल्मीकिः कुशलवौ च ॥

वाल्मी। वत्सौ कुशलवौ, एष रघुपतिः पिता युवयोः; लक्ष्मणः कनिष्ठतातः, सीतादेवी जननी, एष राजर्षिर्जनको माता महः।

सीता ॥ सहर्षकरुणाद्भुतं विलोक्य॥ कधं तादो (४)।

कुशलवौ॥ हा तात, हा अम्ब, हा मातामह।

---

(१)। जीवितास्मि।

(२)। वत्स दृष्टोऽपि चिरञ्जीव।

(३)। कुच तौ पुत्रकौ मे।

(४)। कथं तातः।

Digitized by Google

रामलक्ष्मणौ॥ सहर्षमालिङ्ग्य॥ ननु वत्सौ, पुण्यैः प्राप्ता स्थः।

सीता। एहि जादु, कुश, एहि जादु लव, चिरस्स परिष्वजध पुणो जम्मन्तरगदं जणणिं (१)।

कुमारा॥ तथा कृत्वा॥ धन्यौ स्वः।

सीता। भअवं पणमामि (२)।

वाल्मी। दृष्टश्चेव चिरं भूयाः।

सीता। अज्जहे तादो, कुलगुरु, अज्जाअणो, सभत्तुका अज्जा सान्ता देवी, सलक्खणा सुप्पसन्ना अज्जउत्तचलणा, समं कुसलवावि दीसंन्ति, ता णिब्भरन्हि आणन्देण (३)।

॥ नेपथ्ये कलकलः॥

वाल्मी॥ उत्थायाशीर्वाक्यं च॥ उपहतलवणो मधुरेश्वरः प्राप्तः।

लक्ष्म। सानुषङ्गानि कल्याणानि।

---

(१) एहि जात कुश, एहि जात लव, चिरस्य परिष्वजस्व पुनर्जन्मान्तरगतां जननीं।

(२) भगवन् प्रणमामि।

(३) तातः कुलगुरुः, आर्य्याजनः, सभर्तृका, आर्य्या शान्ता देवी, सलक्ष्मणाः सुप्रसन्ना आर्य्यपुत्रचरणाः समं कुशलवावपि दृश्यन्ते, तन्निर्भरास्मि आनन्देन।

Digitized by Google

Ed. 18. Sg. 5 Sh. 1 B.

रामः । सर्व्वमिदमनुभवन्नपि न प्रत्येमि ॥ यदा ॥ प्रकृतिरियमभ्युदयानां ।


वाल्मी । रामभद्र उच्यतां, भूयः किमस्ते प्रियमुपकरोमि ।

रामः । अतः परमपि प्रियमस्ति तथापीदमस्तु ;

पापप्रश्नं पुनाति, वर्द्धयति च श्रेयांसि, धत्ते कथा,
मङ्गल्या च मनोहरा च जगतो मातेव गङ्गेव च;
तामेतां परिभावयन्त्वभिनयैर्विन्यस्तरूपाबुधाः,
ग्रन्थग्रन्थविदः कवेः परिणतप्रज्ञस्य वाणीमिमां ।

॥ इति निष्क्रान्ताः सर्व्वे ॥

॥ गर्भाङ्कनाम सप्तमोऽङ्कः समाप्तः ॥



Digitized by Google